वादिभिः॥५४॥दैवेप्रतिनिविष्टेचकिंश्रेयोमन्यतेभवान्॥शांतोराजधर्मेकालकवृक्षीये॥१०३॥मुनिरुवाच॥अथचेत्पौरुषं

१८७

सहस्त्रश्रियमन्येषां यद्यपित्वयिनास्तिसा॥ अन्यत्रापिसतींलक्ष्मींकुशलाभुंजतेसदा॥३३॥ अभिनिस्यंदतेश्रीर्हिसत्यंविद्वते
जने॥ श्रियंचपुत्रपौत्रंचमनुष्याधर्मचारिणः॥३४॥ योगधर्मविरोधीराःस्वयमेवत्यजंत्सुत॥ बहुसंकुसुकंहष्ट्वा विधित्सासाधनेन
वा॥३५॥ तथान्येसंत्यजंत्येवंमत्वापरमदुर्लभं॥ त्वंपुनःप्राज्ञोनृपःसन्बहुपरांपरितप्यसे॥३६॥ अकाम्यान्कामयानोर्थान्पराधीनान्
उपद्रवान्॥ तांबुद्धिमुपजग्राहत्वमेवैतत्परित्यज॥३७॥ अनर्थोर्थाःपरंपराह्यर्थोर्थानर्थानुपिराः॥ अर्थाश्चैवहिकेषांचिद्धननाशं
भवत्युत॥३८॥ अर्थस्यतत्सुखंमत्वाश्रियमन्यःपरीप्सति॥ रममाणःश्रियाकश्चिन्नान्यच्छ्रेयोभिमन्यते॥३९॥ तथातस्यतस्यनस्यस
मारंभोदिनश्यति॥ कृच्छ्राल्लब्धमभिप्रेतंयदिकौशल्यंनश्यति॥४०॥ तदानिर्विद्यतेसोर्थात्परिभग्नक्रमोनरः॥ धर्ममेकेभिपद्यंतेक
ल्याणाभिजनानराः॥४१॥ परत्रसुखमिच्छंतोनिर्विद्यसुखलौकिकात्॥ जीवितंसंत्यजंत्येकेधनलोभपराजनाः॥४२॥ नजीवितार्थं
मन्यंतेपुरुषाहिधनादृते॥ पश्यतेषांचकृपणतांपश्यतेषामबुद्धितां॥४३॥ अध्रुवेजीवितेमोहादर्थतृष्णामुपाश्रिताः॥ सर्वमेवदिनाशे

तां ७

य ४

188

छादनानि च॥ शय्यासनानि पानानि महार्हाणि गृहाणि च॥१२॥ यन्निर्गमो न्मगजानी निरस्तगंधाः फलानि च॥ न ह्येवं संजयेय
स्त्वं यथा न श्येत्स्वयं परः॥१३॥ यथैवं प्रतियोद्धव्यो यथुपेत्य रणमर्हति॥ पुनर्नैवं न कार्यः शत्रुः सुनयमोच्छता॥१४॥ रमस्व परमाभि
चे विषये शीतसंमतः॥ भजस्व श्वेतकार्पासे निर्मिते कर्मसमर्थके॥१५॥ आरंभांश्चास्य महतो दुष्करांश्च प्रयोजय॥ नदीवद्धा विरोधां
श्च बलवद्भिर्विरुध्यतां॥१६॥ उद्यानानि महार्हाणि शयनान्यासनानि च॥ धृतिधीरः सुखेनैव कोशमस्य विरेचय॥१७॥ य
ज्ञदानेषु शाध्यस्मै ब्राह्मणान्नत्रवर्पणा च॥ ते त्वां प्रतिकृष्यं तितमोऽस्यंति वृकाइव॥१८॥ आशंसयं पुराणशीलः आज्ञो निपरमां ग
तिं॥ विनियम्य पुरापतनमेधा ज्ञोति मानव॥१९॥ कोशात्त्वयेत्वमिज्ञाराणां वृशं कोशस्य गृह्णंति॥ उभयत्र प्रशांतस्य धर्मे चाधर्म एव
च॥२०॥ फलार्थं नृतंत्रु छिंधेनेन नंदंति शत्रव॥ न चास्मै मानुषं कर्म दैवमस्योपवर्णय॥२१॥ असंशयं दैवपरः क्षिप्रमेव विन
श्यति॥ याजयेनं विश्वजिता सर्वस्वेन विपुनद्धितं॥२२॥ ततो गच्छत्वसिद्धार्थः पीड्यमानो महावनं॥ योगधर्मविदं रूपं किंचि

स्थान३

१८

किंचित्त्वत्तवियोगेन निपश्यसि ॥ ब्रवीमि त्वां तु जेतासि रंजसि प्रतिपन्नये ॥१॥ तं चेच्छक्तो विनिर्माणं कर्म चैव करिष्यसि ॥ स्मरस्त
र्वमशेषेण यत्त्वां वक्ष्यामि तत्त्वतः ॥२॥ आचरिष्यसि चेत्कर्म महतोऽर्थानवाप्स्यसि ॥ गत्वा राज्ञः समं चैवाग्रतस्त्जीवायनं प्रियं
३॥ अथैतत्प्रोक्तवान्राजन्मुनर्कृहि ब्रवीमि ते ॥ राजोवाच ॥ ब्रवीतु भगवान्नीतिमुपपन्नोस्म्यहं विभो ॥४॥ अनो हेयं भवत्वघतय
सूहस्समागमः ॥ मुनिरुवाच ॥ हित्वा दंभं च कामं च क्रोधं हर्षं भयं तथा ॥५॥ काप्यमिज्ञासीयत्वसुः प्रणिपत्य हं तां जयः ॥ त्वम्
नमेन शोचेन कर्मणा च गिरा भयं ॥६॥ दातुमर्हति ते वित्तं वैदेहः सत्यसंगरः ॥ प्रमाणं सर्वभूतेषु प्रग्रहं च भविष्यसि ॥७॥ ततः स
हायान्सोमात्मात्मस्य सर्वव्यसनांश्च भाच ॥ वर्तमानः स्वशास्त्रैवैसंप्रज्ञात्मा जितेंद्रियः ॥८॥ अभ्युद्धरसि चात्मानं तं प्रसादयन्वध
जः ॥ तेनैव त्वं धृतिमता स्वशास्त्रेणाभिसत्कृतः ॥९॥ प्रमाणं सर्वभूतेषु गत्वा प्रग्रहणमेव च ॥ ततः सुहृद्बलं लब्ध्वा मंत्रयित्वा सुन
त्रिभिः ॥ अंतरैर्भेदयित्वा त्वं बिल्वं बिल्वेन भेदय ॥ परैर्वा संविदं कृत्वा बलमप्यस्य घातय ॥११॥ अलभ्या ये शुभाभावाः स्त्रियश्चा

भेद १

१०७

पिं मुनिर्व्वचनमब्रवीत् ॥ अयं राजकुले जातो विदितोभ्यंतरो मम ॥ ९ ॥ आदर्श इव शुद्धात्मा शारदश्चंद्रमा यथा ॥ नास्मिन्स्वल्पो

ऽप्येव जिनं संविनोमेपरीक्षितः ॥ १० ॥ तेनानं तं संधिरेवास्तु विश्वसास्मिन्यथा मयि ॥ न राज्यमनपायेदं वंशकांक्षा तथापि अहं ॥ ११

अमायः सूरस्वस्या बुद्धिनो मंत्रस्तववान् ॥ तास्मांचैवोभयराजन्यस्य पराजप्रयोजनं ॥ १२ ॥ धर्म्मो न्यवांधवित्लोदे नान्यास्ति गति

रीदृशी ॥ महात्मा राजपुत्रोयं सतां मार्गमनुष्ठितः ॥ १३ ॥ ससंगृहीतस्त्वं वै परस्त्वया धर्म्मपुरोगमः ॥ संसेव्यमानः सन्मूलं गरुडाय

ग ५

ब्रह्मगं धर्म्मराज ॥ १४ ॥ यद्ययं प्रतियुद्धे त्वां स्वकर्मन्न वियस्यतत ॥ जिगीषमाणस्त्वां युद्धे पितृपैतामहे पदे ॥ १५ ॥ त्वं चापि प्रतियुध्ये

या विजिगीषुर्बुद्धिस्थितः ॥ अयुद्धेव विवो [illegible] वशे कुरु हिते स्थितं ॥ १६ ॥ स त्वं धर्म्ममवेक्षस्व हित्वा लोभमसांप्रतं ॥ न चकामात्र

वद्वेतास्तु धर्म्मं हन्तुमर्हसि ॥ १७ ॥ नैव नित्यं जयस्तात नैव नित्यं पराजयः ॥ तस्माद्भोजयितव्यश्च भो तत्कम्प्द परोजनः ॥ १८ ॥ आत्म

२८४

न्यपि वसंदृश्यावुभौ जयपराजयौ ॥ निःशेषकारिणां तात निःशेषकरणाद्भयं ॥ १९ ॥ इत्युक्तः प्रत्युवाचेदं वचनं ब्रह्मराक्षसं ॥ प्रति

दस्यौपवर्गये॥२३॥अपित्यागंतु भेषतत्कच्चिद्रूपेदनामयं॥सिद्धेनौषधियोगेनसर्वशल्यविनाशिना॥२४॥नागार्त्तस्यात्मनुष्यांश्च
कृतेनैतदुपद्यातये॥एतेचान्येचबहवोदंभयोगाःसुचिंतिताः॥२५॥शक्याविषह्यहन्तुंकर्तुंपुरुषेणाकृतात्मना॥इतिशांतिपर्वणि
राजधर्मेकालकवृक्षीये॥१०४॥राजोवाच॥ननिकृत्यानदंभेनब्रह्मन्निच्छामिजीवितं॥नाधर्मयुक्तमिच्छेयमर्थान्सुमहतोप्यहं॥
१॥पुरस्तादेवभगवन्मयैतदपवर्जितं॥येनमांनाभिशंकेतयेनकृत्स्नंहितंभवेत्॥२॥आनृशंस्येनधर्मेणलोकेह्यस्मिंजि
जीविषुः॥नाहमेतदलंकर्तुंनैतत्त्वय्युपपद्यते॥३॥मुनिरुवाच॥उपपन्नस्त्वमेतेनयथाक्षत्रियभाषसे॥प्रकृत्याह्युपपन्नोसिबु
द्ध्याचाद्भुतदर्शनः॥४॥उभयोरेववामर्थेयतिष्येतवतस्यच॥संश्लेषंवाकरिष्यामिशाश्वतंह्यनपायिनं॥५॥त्वादृशंहिकुलेजात
मनृशंसंबहुश्रुतं॥अमात्यंकोनकुर्वीतराज्यप्रणयकोविदं॥६॥यस्त्वंप्रव्रजितोराज्याद्व्यसनंचोत्तमंगतः॥आनृशंस्येनवृत्तेन
क्षत्रियेच्छसिजीवितं॥७॥आगंतामद्गृहेतातवैदेहःसत्यसंगरः॥अथाहंतंनियोक्ष्यामितत्करिष्यत्यसंशयं॥८॥ततआहूयवै

190

सेनावृत्तिस्तथैवच ॥ परिज्ञानंचदुष्टस्यलक्षणंचसतामपि ॥३॥ महतोनाधिकांवावंतथ्यालक्षणंचयत् ॥ मध्यमस्यचतुष्ट्य
र्पप्याप्ययंविवर्द्धते ॥४॥ त्रीरणपोरुणाद्रातिष्ठयथाधर्म्मप्रकीर्तितं ॥ लघुनादेशरूपेणग्रंथयोगेनभारत ॥५॥ विनियोगस्त
थावृत्तमुक्तंचैवतथैवच ॥ गणानांवृत्तिमिच्छामिश्रोतुंमतिमतांवर ॥६॥ यथागणाःप्रवर्द्धंतेनभिद्यंतेचभारत ॥ अरींश्चविजि
गीषंतेसुहृदःप्राप्नुवंतिच ॥७॥ भेदमूलोविनाशोहिगणानामुपलक्षये ॥ मंत्रसंवरणंदुःखंबहूनामितिमेमतिः ॥८॥ एतदि
छाम्यहंश्रोतुंनिखिलेनपरंतप ॥ यथाचतेनभिद्येरंस्तच्चमेवदपार्थिव ॥९॥ भीष्मउवाच ॥ गणानांचकुलानांचराज्ञांभरतसत्त
म ॥ वैरसंदीपनावेतौलोभामर्षौनराधिप ॥१०॥ लोभमेकोहिवृणुतेततोमर्षमनंतरं ॥ तौक्षयव्ययसंयुक्तावन्योन्यंचविन
शिनौ ॥११॥ चारमंत्रबलैर्भूयाःसामदानादिभेदनैः ॥ क्षयव्ययभयोपायैःकर्षयंतीतरेतरं ॥१२॥ तत्रदानेनभिद्यंतेगणाःसं
घातवृत्तयः ॥ भिन्नाविमनसःसर्वेगच्छंत्यरिवशंभयात् ॥१३॥ भेदनस्तुविनश्यंतिहिभिन्नास्तुसुजयाःपरैः ॥ तस्मात्संघातयोगेन

१९०

प्रज्ञाभिसत्त्वतप्रज्ञाऽहमनुमान्यताम्॥२०॥यथाब्रूयान्महाप्राज्ञोयथाब्रूयान्महाश्रुतः॥श्रेयस्कामोयथाब्रूयाद्भयंदेवंगतस्त्वम्॥२१॥
यथैवत्वनृशंसोस्मिकरिष्यामिवचस्तथा॥नहिपरमंश्रेयोनयज्ञास्मिविदारत॥२२॥ततःकौशल्यमाहूयवैदेहोवाक्यमब्रवी
त्॥धर्मतोनीतितश्चैवलोकश्चविजितोमया॥२३॥अहंत्वयाचात्मगुणैर्जितःपार्थिवसत्तम॥आत्मानमनवज्ञायजितवद्व
र्ततांभवान्॥२४॥नावमन्यामितेबुद्धिंनावमन्येचपौरुषं॥नावमन्येजयामीतिजितवद्वर्ततांभवान्॥२५॥यथावत्पूजितोराज
न्गृहंगन्तासिमेभवान्॥ततस्तुपूजितौविप्रविश्वस्तौजग्मतुर्गृहान्॥२६॥वैदेहस्त्वथकौशल्यंप्रवेश्यगृहमंजसा॥पाद्यार्घ्यम
धुपर्कैस्तंपूजार्हंप्रत्यपूजयत्॥२७॥ददौदुहितरंचास्मैरत्नानिविविधानिच॥अयंराज्ञांपरोधर्मोनित्यौजयपराजयौ॥२८॥इति
शांतिपर्वणिराजधर्मेकालकवृक्षीये॥१०५॥युधिष्ठिरउवाच॥ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप॥धर्मोवृत्तंचवृत्तिंचवृत्त्युपा
याःफलानिच॥१॥राज्ञांवृत्तंचकोशंचकोशसंजननंजयः॥अमात्यगुणवृत्तिंचप्रकृतीनांचवर्द्धनं॥२॥षाड्गुण्यगुणकल्पश्च

प्रत्यवसीदंतिक्षिप्यानर्थाभवंतिच॥तेषामन्योन्यभिन्नानांस्वशक्तिमनुतिष्ठतां॥२६॥निग्रहःपंडितैःकार्यःक्षिप्रमेवप्रधानतः॥कुले
षुकलहाजाताःकुलवृद्धैरुपेक्षिताः॥२७॥गोत्रस्यनाशंकुर्वंतिगणभेदस्यकारकं॥आभ्यंतरंभयंरक्ष्यंसारंबाह्यतोभयं॥२८॥आभ्यं
तरभयंराज्ञांसद्योमूलानिकृंतति॥अकस्मात्क्रोधमोहाभ्यांलोभाद्वापिस्वभावजात्॥२९॥अन्योन्यमभिजायंतेनतत्पराभवलक्षणं
नीत्यावसहृद्गणाःसर्वैकुलेनसदृशास्तथा॥नचोद्योगेनबुध्यावरूपद्रव्येनवापुनः॥भेदाच्चैवप्रदानाच्चभिद्यंतेरिपुभिर्गणाः॥३०॥
नस्मात्संघातमेवाहुर्गणानांशरणंमहत्॥३२॥इतिश्रीशांतिपर्वणिराजधर्मे॥१०८॥युधिष्ठिरउवाच॥महानयंधर्मपथोबहुशा
खश्चभारत॥किंस्विदेवेहधर्माणामनुष्ठेयतमंमतं॥१॥किंकार्यंसर्वधर्माणांगरीयोभवतोमतं॥यथाहंपरमंधर्ममिहलभेयं
वदस्वमां॥२॥भीष्मउवाच॥मातापित्रोर्गुरूणांचसाधुबालनराणांस्तथा॥दीनानाथहीनयत्नानांपूजाबहुमतामया॥३॥इहयुक्तोन
रोलोकान्यशश्चमहदश्नुते॥यद्यतेभ्यस्तुजानीयुःकर्मतानसुपरजिनाः॥४॥धर्म्मंविरुद्धंनरपैतत्कर्तव्यंयुधिष्ठिर॥नचतैरभ्यनु

प्रयतंतेन्यगणाःसदा॥१४॥अर्थाश्चैवाधिगम्यंतेसंघातबलपौरुषैः॥बाह्याश्चमैत्रींकुर्वंतितेषुसंघातवृत्तिषु॥१५॥ज्ञानवृद्धाःप्रशं
संतिशुश्रूषंतःपरस्परं॥विनिवृत्ताभिसंधानाःसुखमेधंतिसर्वशः॥१६॥धर्मिष्ठान्व्यवहारांश्चस्थापयंतश्चशास्त्रतः॥यथावत्प्र
तिपश्यंतोविवर्द्धंतेगणोत्तमाः॥१७॥पुत्रान्भ्रातॄन्निगृह्णंतोविनयंतश्चतान्सदा॥विनीतांश्चप्रगृह्णंतोविवर्द्धंतेगणोत्तमाः १८
चारमंत्रविधानेषुकोशसन्निचयेषुच॥नित्ययुक्तामहाबाहोवर्द्धंतेसर्वतोगणाः॥१९॥प्राज्ञान्शूरान्महोत्साहान्कर्मसुस्थिरपौ
रुषान्॥मानयन्तःसदायुक्ताविवर्द्धंतेगणान्नृप॥२०॥द्रव्यवंतश्चशूराश्चशस्त्रज्ञाःशास्त्रपारगाः॥कृच्छ्रास्वापत्सुसंमूढान्गणाः
संतारयंतिते॥२१॥क्रोधोभेदोभयंदंडःकर्मणांनिग्रहोवधः॥नयंत्यरिवशंसद्योगणान्भरतसत्तम॥२२॥तस्मान्मानयितव्यास्तेग
णमुख्याःप्रधानतः॥लोकयात्रासमायत्ताभूयसीतेषुपार्थिव॥२३॥मंत्रगुप्तिःप्रधानेषुचारश्चामित्रकर्शन॥नगणाःकृत्स्नशो
मंत्रंश्रोतुमर्हंतिभारत॥२४॥गणमुख्यैस्तुसंभूयकार्यंगणहितंमिथः॥पृथग्गणस्यभिन्नस्यविततस्यततोन्यथा॥२५॥अर्थाः

इतरेषु ३

192

दृशावार्याद्रुपाध्याय उपाध्यायात्पिता दश ॥ पितॄन्दशगुणं माता सर्वां वैयपृथिवीमपि ॥१८॥ गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः ॥
गुरूर्गरीयात्पितरो मातरश्चेति मे मतिः ॥१९॥ उभौ हि मातापितरौ जन्मन्येवोपयुञ्जतः ॥ शरीरमेवशान्तं पिता माता च भारत ॥२०॥
आचार्यशिष्या या जातिः सा दिव्या पितरेष्वपि ॥ अवध्या हि सदा माता पिता चाप्यपकारिणौ ॥२१॥ न संदुष्यति तं कृत्वा न च ते दूषयन्ति तं ॥
धर्माय यतमानानां विदुर्देवा महर्षिभिः ॥२२॥ यश्चावृणोत्यवितथेन कर्मणा ऋतं ब्रुवन्ननृतं संप्रयच्छन् ॥ तं वै मन्येत पितरं मातरं च
तस्मै न द्रुह्येत्कृतमस्य जानन् ॥२३॥ विद्यां श्रुत्वा ये गुरुं नाद्रियन्ते प्रत्यासन्ना मनसा कर्मणा वा ॥ तेषां पापं भ्रूणहत्याविशिष्टं नान्यस्ते
भ्यः पापकृदस्ति लोके ॥२४॥ यथैव ते गुरुभिर्भावनीयास्तथा तेषां गुरवोऽप्यर्चनीयाः ॥२५॥ तस्मात्पूजयितव्याश्च संविभज्याश्च यत्नतः ॥
गुरवोऽर्चयितव्याश्च पुराणं धर्ममिच्छता ॥२६॥ येनानुप्रीणाति पितरं तेन प्रीतः प्रजापतिः ॥ प्रीणाति मातरं येन पृथिवी तेन पूजिता ॥२७॥ १९२
येनानुप्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितं ॥ मातृतः पितृतश्चैव तस्मात्पूज्यतमो गुरुः ॥२८॥ ऋषयश्च हि देवाश्च प्रीयन्ते पितृभिः सह ॥

ज्ञानो धर्म्ममन्यं समाचरेत्॥५॥ एवं वै तेऽभ्यनुज्ञानीयुः सं धर्म्म इति निश्चयः॥ एत एव त्रयो लोका एत एवाश्रमास्त्रयः॥६॥ एत एव त्रयो वे-
दा एत एव त्रयोऽग्नयः॥ पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः॥७॥ गुरुराहवनीयस्तु साग्नित्रेता गरीयसी॥ त्रिष्वप्रमाद्यन्
स्त्रीँल्लोकांश्च विजेष्यसि॥८॥ पितृवृत्त्या त्विमं लोकं मातृवृत्त्या तथापरं॥ ब्रह्मलोकं गुरोर्वृत्त्या नियमेन तरिष्यसि॥९॥ सम्यगेतेषु वर्तस्व
त्रिषु लोकेषु भारत॥ साधुब्राह्मणाग्रजांस्त्वं न चान्येषां च भारत॥१०॥ यशः प्राप्स्यसि भद्रं ते धर्मं च सुमहत्फलं॥ नैतानतिशयेज्जातु नात्यश्नी-
यान्न दूषयेत्॥११॥ नित्यं परिचरेश्चैव तद्वै सुकृतमुत्तमं॥ कीर्तिं पुण्यं यशो लोकान् प्राप्स्यसे राजसत्तम॥१२॥ सर्वे तस्यादृता लोका यस्यैते नृप
आदृताः॥ अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः॥१३॥ न चायं न परो लोकस्तस्य चैव परंतप॥ अमानिता नित्यमेव यस्यैते गुरवो
त्रयः॥१४॥ न चास्मिन्न परे लोके यशस्तस्य प्रकाशते॥ न चान्यदपि कल्याणं परत्र समुदाहृतं॥१५॥ तेभ्य एव हि यत्सर्वं कृत्वा न विसृजाम्य-
हं॥ तदासीन्मे शतगुणं सहस्रगुणमेव च॥१६॥ तस्मान्मे संप्रकाशन्ते त्रयो लोका युधिष्ठिर॥ दशैव तु सदाचार्यः श्रोत्रियानतिरिच्यते॥१७

धम                    भजानन्त्या

तादृशःसत्यान्नृतयोस्तत्व(?)नेत्वात वध्यते। यत्र विषये अहिंसोपकारादेः सत्यं अनुष्ठितं निश्चितं ते सत्यान्यो प्रवृत्ते निश्चितै वित भवति। ६॥ गं धस्य धूम्र वदुच्छ सर्वप्राणि वधाय उद्यतस्य वधात् वलाकः व्याधः हिंस्रः स्वभा स्वर्ग व प्राप्येति कर्णपर्वकथा ऽनुसंधेया॥७॥ ×३

सत्यस्य वचनं साधु न सत्याद्विद्यते परं। यत्तु लोकेषु दुर्ज्ञातं तं न प्रवक्ष्यामि भारत॥४॥ भवेत्सत्यमवक्तव्यं वक्तव्यमनृतं भवेत्। यत्रानृतं भवेत्सत्यं सत्यं वाप्यनृतं भवेत्॥५॥ तादृशो वध्यते बालो यत्र सत्यमनिष्ठितं। सत्यानृते विनिश्चित्य ततो भवति धर्मवित्॥६॥ अप्य नार्योऽकृतप्रज्ञः पुरुषोऽप्यतिदारुणः। सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव॥७॥ किमाश्चर्यमतो यन्मूढो धर्मकामोऽप्यधर्मवित्। सुमहत्प्राप्नुयात्पापं गंगायामिव कौशिकः॥८॥ तादृशोऽयमनुप्रश्नो यत्र धर्मः सुदुर्लभः। दुष्करः प्रतिसंख्यातुं तत्केनात्र व्यवस्यति॥९॥ प्र भवार्थाय भूतानां धर्मप्रवचनं कृतं। यस्मात्प्रभवसंयुक्तः स धर्म इति निश्चयः॥१०॥ धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः। यत्स्या द्धारणसंयुक्तः स धर्म इति निश्चयः॥११॥ अहिंसार्थाय भूतानां धर्मप्रवचनं कृतं। यः स्यादहिंसासंयुक्तः स धर्म इति निश्चयः॥१२॥ श्रु तिधर्म इति ह्येके नेत्याहुरपरे जनाः। न च तत्प्रत्यसूयामो न हि सर्वं विधीयते॥१३॥ येऽन्यायेन जिहीर्षन्तो धनमिच्छन्ति कस्यचित्। तेभ्यस्तु न तदाख्येयं स धर्म इति निश्चितः॥१४॥ अकूजनेन चेन्मोक्षो नावकूजेत्कथंचन। अवश्यं कूजितव्ये वा शंकेरन्वाप्यकूजनात्॥१५॥ श्रेय

कः सत्यवादी वै भिक्षुः सत्यवक्ता नाभिमानित्वात् मार्गमुपदिश्य काषायिकान् पातितवान् असौ धर्मविन्नेत्यर्थः॥ कौशिकः तीने सत्यवशात् सर्पविशेषा[illegible] [illegible] [illegible] याः सर्पाः तीव्रष्ट्या सर्वलोकनाशः ×५× श्रुतीति। श्रुत्युक्तोऽर्थः सर्वधर्मेषु त्यादिना। श्वेनादेर्वमेत्या भावात्। छलतोऽपि वयत्कर्म नानर्थे नांतु बध्यते॥ ×



१९३

अनुवृत्त्यः ५

५५ मूढः कर्णपर्वे ५८ मूकः। गंगा संभवेत॥८॥

तूपकार न्योपि

कर्णपर्वीतः ३

धर्मवत् तांतिवि तेति ४

येवेला भिवुनन्द जनेर ३

१९३

कौशिकः

केवलप्रीतिहेतुत्वात्तेभ्य[illegible]ति शेवनमीदृक्फलस्य शुश्रूषादेर्यस्तु फलदर्शनरवधर्म इत्यर्थः॥ स्वयस्वनाथ
मपि विधीयते धर्मत्वेन बोध्यते ॥१३॥ प्रदृति। अन्यायेनेति छेदः। बुभुक्षितेभ्यः स्वेभ्यो भ्यो धनिकेन ज्ञापयेत् पितृभ्यस्तु ज्ञापयेदेवे
त्यर्थः॥१४

पूज्यमानेषु गुरुषु तस्मात् पूज्यतमो गुरुः॥२९॥ केन विज्ञवत्केन स्वकर्जयो गुरुर्भवेत्॥ न च माता न च पिता लोके यादृशो मे गुरुः॥ ३०॥ न
ते वमानमर्हन्ति न च तेषां दूषयेत् कृतं॥ गुरूणामेव सत्कारं विदुर्देवा महर्षिभिः॥३१॥ मन्यत्तु पितरं मातरं च ये भिद्युर्यन्ते मनसा कर्मणा वा॥
तेषां पापं भ्रूणहत्या विशिष्टं तस्मान्नान्यः पापकृदस्ति लोके॥३२॥ साधवो गुरवः पूज्या आश्रमा गावस्तपस्विनः॥ तत्पूजा करणे दोषो ब्रह्म
त्वा समो भुवि॥३३॥ भूत्वा समृद्धो यो न विभर्ति पुत्रः स्वयोनिजः पितरं मातरं च॥ तदेव पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पापकृदस्ति लोके॥
३४॥ मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य गुरुघातिनः॥ चतुर्णां स्वयमेतेषां निष्कृतिं नानुशुश्रुम॥३५॥ एतत्सर्वमनिर्देशेनेवमुक्तं यत्कर्तव्यं पु
रुषेणेह लोके॥ एतच्छ्रेयो नान्यदस्माद्विशिष्टं सर्वान्धर्माननुसृत्यैतदुक्तं॥३६॥ शांतौ राजधर्मे॥१०७॥ युधिष्ठिर उवाच॥ कथं धर्मे स्थ
तुमिच्छन्नरो वर्तेत भारत॥ विद्वञ्जिज्ञासमानाय प्रब्रूहि भरतर्षभ॥१॥ सत्यं चैवानृतं चोभे लोकानावृत्य तिष्ठतः॥ तयोः किमाचरेद्राजन्पु
रुषो धर्मनिश्चितः॥२॥ किंस्वित्सत्यं किमनृतं किंस्विद्धर्म्यं सनातनं॥ कस्मिन्काले वदेत्सत्यं कस्मिन्कालेऽनृतं वदेत्॥३॥ भीष्म उवाच॥

अथवत्सकानिधनार्जनकारी अयमर्थो बलात्कृतं तु तेनैवीत्यादालीकृतो पक्षः ॥ तेवेतत्कपटं करोति तेन धनं नक्षमिति वदन्ति वित्त ताडृशा रनितेषु

अमानवं ग्राछरंशटवेवकः तु मानवं २२। धनेनैव श्रेयो न धर्म इत्यर्थः। २३। २४। मा संगमः संगमो मा कार्षीत् अहेतुधर्मिणि लि। विप्रयो

राहृतं हंतिहत स्वसहन्यते ॥ ३८ ॥ नेषुयः समयं कश्चित्कुर्वीत नहतबुद्धिषु ॥ ३९ ॥ यथा काकश्च गृध्रश्च तथैवोपधिजीवनः ॥ ऊर्ध्वं देहवि

योगांते भवत्येतासु योनिषु ॥ ४० ॥ यस्मिन्यथा वर्त्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्म्मः ॥ मायाचारो मायया बाधितव्यः साध्वाचारः सा

धुना प्रत्युपेयः ॥ ४१ ॥ शांतेराजधर्म्मे सत्यानृतके ॥ १०९ ॥ युधिष्ठिर उवाच ॥ क्लिश्यमानेषु भूतेषु तैस्तैर्भावैस्ततस्ततः ॥ दुर्गाण्यतितरं

येन तन्मे ब्रूहि पितामह ॥ १ ॥ भीष्म उवाच ॥ आश्रमेषु यथोक्तेषु यथोक्तं ये द्विजातयः ॥ वर्त्तंते संयतात्मानो दुर्गाण्यतितरंतिते ॥ २ ॥ ये द

म्भावं चरंति स्म येषां वृत्तिश्च संयता ॥ विषयांश्च निगृह्णंति दुर्गाण्यतितरंतिते ॥ ३ ॥ प्रत्याहुर्नोच्यमाना ये न हिंसंति च हिंसिताः ॥ प्रय

च्छंति न याचंते दुर्गाण्यतितरंतिते ॥ ४ ॥ वासयंत्यतिथीन्नित्यं नित्यं ये चानसूयकाः ॥ नित्यं स्वाध्यायशीलाश्च दुर्गाण्यतितरंतिते ॥ ५ ॥

मातापित्रोश्च ये वृत्तिं वर्त्तंते धर्मकोविदाः ॥ वर्ज्जयंति दिवास्वप्नं दुर्गाण्यतितरंतिते ॥ ६ ॥ ये पापं न कुर्वंति कर्म्मणा मनसा गिरा ॥ निक्षिप्त

दंडा भूतेषु दुर्गाण्यतितरंतिते ॥ ७ ॥ ये न लोभान्नयंत्यर्थान् राजानो रजसान्विताः ॥ विषयान्परिरक्षंति दुर्गाण्यतितरंतिते ॥ ८ ॥ स्वेषु दा

जनं विमोगं पतेषा पाः कुर्वीतीत्यर्थः। २५। अयुभिति। पापानां पापिनां मध्ये वा बद्धउप (५२) देशार्हः कश्चिदपि नास्ति किंतु सर्वं

धर्म इत्येव तेषां निश्चयः। अधर्म ... २६। ... ईदृशैः ... मिष्यामीति धृतं यथा स्वकीर्वेत।



स कुर्वीत। ताडृशानां वधे पुण्यमस्तीति भावः। २७। २८। अकृतात्मनः। १०९। अध्यायः॥

१९५

१९४

कूजनन [illegible]
(margin) पार्थः ॥ (margin) पूर्वकं पूर

अपि लेतुं धर्म (१७) इति सार्द्धः ॥ यदा धनं त्वदीयं ... मो मरीयः ... [illegible] ... इति नियम
॥१८॥ तेभ्यः स्तेनेभ्यः ॥ ... स्यात् तदा ... [illegible] ... इति वेत्
... [illegible] ... दीना धुनन ... [illegible]

स्तज्ञानन्तं वक्तुं सत्यादिति विचारितं ॥ यः पापैः सह संबंधान्मुच्यते शपथादपि ॥१६॥ न तेभ्योपि धनं देयं शक्ये सति कथंचन ॥ पापेभ्यो
हि धनं दत्तं दातारमपि पीडयेत् ॥१७॥ स्वशरीरोपरोधेन धनमादातुमिच्छति ॥ सत्यसंप्रतिपत्त्यर्थं ये ब्रूयुः साक्षिणः क्वचित् ॥१८॥ अ
नुक्त्वा तत्र तद्वाक्यं भवंत्यनृतवादिनः ॥ प्राणात्यये विवाहे च नवोक्तेप्यनृतं भवेत् ॥१९॥ अर्थस्य रक्षणार्थाय परेषां धर्मकारणात् ॥ प
रेषां सिद्धिमाकांक्षन्नीचः स्याद्धर्मभिक्षुकः ॥२०॥ प्रतिश्रुत्य न दातव्यः स्वकार्यस्तु बलात्कृतः ॥ कश्चिद्धर्मसमयात्प्रच्युतो धर्मसाधनः ॥२१॥
दंडेनैव स हंतव्यस्तं पंथानं समाश्रितः ॥ च्युतः सदैव धर्मेभ्यो मानवं धर्ममास्थितः ॥२२॥ शठः स्वधर्ममुत्सृज्य तमिच्छेदुपजीवितुं ॥ सर्वोपा
यैर्विहंतव्यः पापो निकृतिजीवनः ॥२३॥ धनमित्येव पापानां सर्वेषामिह निश्चयः ॥ अविषह्या ह्यसंभोज्या निकृत्या पतनं गताः ॥२४॥ च्यु
ता देवमनुष्येभ्यो यथा प्रेतास्तथैव ते ॥ निःपुण्यास्तपसा हीनाश्चैषां तैः सह संगमः ॥२५॥ धर्मं नाशयतां दुःखवनं जीविताद्वियोजनं ॥ अयं ते
रो वतां धर्म इति वा अप्रयत्नतः ॥२६॥ न कश्चिदस्ति पापानां धर्म इत्येष निश्चयः ॥ तथागतं च यो हन्यान्नासौ पापेन लिप्यते ॥२७॥ स्वकर्म

(margin) स्पर्श (margin) रीत

स्यवा क्येस त्यसे प्रतिसंप्रवादार्थं माहृत्तां सादिलो वा (मा२) अ मतुं योग्यं वा उक्तो शतं कृष्या ... स्थैव निश्चय वादित्वात् १
... धनवान ... [illegible] ... पिपन्नीपमर्थ परदेहि ... स्यति २०
पदिनु ... पेर वला भाला ... स्मा ... प्रति श्रुत्वं तदा ना ... तेर्थोथ मर्तनेय या भाग ... तव्यः ॥
सौ

ण्यतितरं ति ते ॥२०॥ ये क्रोधं संनियंछंति व्यक्तान्त्रशमयंति च ॥ न च कुप्यंति भक्तानां दुर्गाण्यतितरंति ते ॥२१॥ मद्यं मांसं वर्जयंति न ज्ञयंतीह
मानवाः ॥ जन्ममृत्युभयं चैव दुर्गाण्यतितरंति ते ॥२२॥ यात्रार्थं भोजनं येषां संतानार्थं च मैथुनं ॥ वाक्सत्यवचनार्थाय दुर्गाण्यतितरंति ते ॥
२३॥ ईश्वरं सर्वभूतानां जगतः प्रभवाप्ययं ॥ भक्ता नारायणं देवं दुर्गाण्यतितरंति ते ॥२४॥ यस्य पद्मारक्ताक्षः पीतवासा महाभुजः ॥ सु
हृद्भ्रातेव मित्रं च संबंधी च तवाच्युतः ॥२५॥ य इमान्सकलाँल्लोकान्धर्मो वत्परिवेष्टयेत् ॥ इच्छेत्प्रभुरचिंत्यात्मा गोविंदः पुरुषोत्तमः ॥२६
स्थितः प्रियहिते जिष्णो स एष पुरुषोत्तमः ॥ राजंस्तव च दुर्धर्षो वैकुंठः पुरुषर्षभः ॥२७॥ य एनं संश्रयंतीह भक्ता नारायणं हरिं ॥ ते तरं
तीह दुर्गाणि न चात्रास्ति विचारणा ॥२८॥ दुर्गातितरणं ये च पठंति श्रावयंति च ॥ पाठयंति च विप्रेभ्यो दुर्गाण्यतितरंति ते ॥२९॥ इति कृत्य
समुद्देशः कीर्तितस्ते मयानघ ॥ तरंते येन दुर्गाणि परत्रेह च मानवाः ॥३०॥ स्त्वगंति भगवद्धर्मान्हृत्वेव धर्मतमा मता ॥ ये वा वै भगवन्नाम
मुखे तिष्ठति नित्यशः ॥३१॥ ये तु नैवं हि कुर्वंति न तरंति भवार्णवं ॥ कलिरूपं निनतुनं प्राप्य राजन्न चान्निशामया ॥३२॥ इति श्रीशान्तोराजधर्मे

स्तुत:३

रेखवर्त्तंते न्याय्यवृत्तिम्नताश्च ते ॥ अग्निहोत्रपराः संतो दुर्गाण्यतितरंति ते ॥ ९ ॥ आहवेषु च ये शूरास्त्यक्त्वा मरणजं भयं ॥ धर्मेण राज्यमि
च्छंति दुर्गाण्यतितरंति ते ॥ १० ॥ ये वदंतीह सत्यानि प्राणत्यागेप्युपस्थिते ॥ प्रमाणभूता भूतानां दुर्गाण्यतितरंति ते ॥ ११ ॥ कर्माण्यकुह
कार्याणि येषां भावश्च संनुतः ॥ ये न पुष्पं तपस्यंति कौमारब्रह्मचारिणः ॥ येषामर्थाश्च संबद्धा दुर्गाण्यतितरंति ते ॥ १२ ॥ अनध्यायेषु ये वि
प्राः स्वाध्यायं नेह कुर्वते ॥ तपो निष्ठा सुतपसो दुर्गाण्यतितरंति ते ॥ १३ ॥ ये तपश्च तपस्यंति कौमारब्रह्मचारिणः ॥ विद्यावेदव्रतस्नाता दुर्गा
ण्यतितरंति ते ॥ १४ ॥ ये च संशांतरजसः संशांततमसश्च ये ॥ सत्वे स्थिता महात्मानो दुर्गाण्यतितरंति ते ॥ १५ ॥ येषां न कश्चित्त्रसति त्रस
न्ति हि कस्य चित् ॥ येषां मान्यतमो लोको दुर्गाण्यतितरंति ते ॥ १६ ॥ परस्त्रियां न गच्छंति ये सन्तः पुरुषर्षभाः ॥ धाम्याद्दर्शान्निवृत्ताश्च दु
र्गाण्यतितरंति ते ॥ १७ ॥ सर्वान्देवान्नमस्यंति सर्वधर्मांश्च शृण्वते ॥ ये श्रद्दधाना दांताश्च दुर्गाण्यतितरंति ते ॥ १८ ॥ ये न मानितमिच्छंति
मानयंति च ये परान् ॥ मान्यमाना नमस्यंति दुर्गाण्यतितरंति ते ॥ १९ ॥ ये वेश्मान्याद्धानि कुर्वंति नित्यं नित्यं प्रजार्थिनः ॥ सुविशुद्धेन मनसा दुर्गा

अकवट२

वह्नि...

श्मशाने प्रदिमे वासो समाधिर्मे निशास्पतां॥ आत्म फलं सुकर्म्माणि वाग्वेन धर्म्मकारणं॥१३॥ आग्वेनयो द्विजं हन्या दन्या हन्याद्धनाद्य
जं॥ किंतु न स्यान कं नस्या त्तद्वाद्दत्तं वृथा भवेत्॥१४॥ भवंतः स्वार्थलोभेन केवलं भक्षणेरताः॥ अतु वंधेन्योन्ये मातं न पश्यंति मो हितः
१५॥ अपत्यं यक्षनां गर्धाम पर्यापनैय दूषितं॥ इहवामुत्र वा निष्टं तस्माद्दत्तिं नरोचये॥१६॥ तं स्रुविं पंडितं मत्वा शार्दूलः ख्यातविक्रमः॥
स्त्वात्म सदृशी प्रज्ञां साविवे वरयत्त्वयं॥१७॥ शार्दूल उवाच॥ सोम्य विज्ञान नृपस्त्वं गच्छं प्राज्ञां स्यासह॥ क्रियंतां मी क्षिताभोगाः प
रिर्तार्याश्च पुष्कला॥१८॥ तोस्य॥ इति वयं ख्याता भवंतं ज्ञाय यामहे॥ मद्रुपर्वं हितं चैव ब्रेयश्चाधिभ विष्यति॥१९॥ अयसंतदृश्यनहा
कं मृगेंद्रस्य नरा त्मनः॥ गोमायु संश्लिनं वाक्यं वभाषे किं विहनतः॥२०॥ गोमायुरुवाच॥ सदृशं मृगराजेंद्र तव वाक्यं मदंतरं॥ यत्स
हायान्मृगयसे धर्म्मार्थ कुशलान् शुचीन्॥२१॥ न शक्यं ह्यनमात्येन महत्त्वमनुशासितुं॥ दुष्टामात्येन वा वीर शरीर परि पंथिना॥२२
सहायानं नुरक्तां श्च नयज्ञानुपसंहितान्॥ परस्परमसंस्पष्टान् विजिगीषून लोलुपान्॥२३॥ अनतीनोपधाश्चा ज्ञाद्विहितेनुकाम्मनस्विनः॥

नाम कार्यं ४

पनम्ः
म हानिः ३

मनिम्मत्रं
२

१९६

नीप्सिताः ४

196

दुर्गारोगजरसं॥१०२॥ युधिष्ठिर उवाच॥ असौम्यः सौम्यरूपेण सौम्यात्मा सौम्यदर्शनः॥ ईदृशान्नृपुरुषांस्तात कथं विद्यामहे वयं॥१॥ भीष्म उ
वाच॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ व्याघ्रगोमायुसंवादं तन्निबोध युधिष्ठिर॥२॥ पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः॥ परहिंसा
रतिः क्रूरो बभूव पुरुषाधमः॥३॥ स त्वायुषि परिक्षीणे जगामानीप्सितां गतिं॥ गोमायुत्वं च संप्राप्तो दूषितः पूर्वकर्मणा॥४॥ संस्मृत्य पूर्वभूति
च निर्वेदं परमं गतः॥ न भक्षयति मांसानि परैरुपहृतान्यपि॥५॥ अहिंस्रः सर्वभूतेषु सत्यवाक् सुदृढव्रतः॥ स चकार च यथाकालमाहारं पतिते
फलैः॥६॥ श्मशाने तस्य चावासो गोमायोः संमतोऽभवत्॥ जन्मभूम्यनुरोधाच्च नान्यं वासमरोचयत्॥७॥ न तस्य शौचममृष्यंतस्ते सर्वे सहजा
तयः॥ चालयंति स्म तां बुद्धिं वचनैः प्रश्रयोत्तरैः॥८॥ वससि त्वं वने रौद्रे शौचे वर्तितुमिच्छसि॥ इयं हि विप्रतिपत्तिस्ते यदा त्वं पिशिताशनः॥

विपरीता

९॥ तत्समानो भवास्माभिर्भोज्यं दास्यामहे वयं॥ मूलं शौचं परित्यज्य यद्धि भुक्तं तदस्तु ते॥१०॥ इति तेषां वचः श्रुत्वा प्रत्युवाच समाहितः॥
मधुरैः प्रसृतैर्वाक्यैर्हेतुमद्भिरनिष्ठुरैः॥११॥ अप्रमाणं प्रसूतिर्मे शीलेन क्रियते कुलं॥ प्रार्थयामि च तत्कर्म येन विस्तीर्यते यशः॥१२

नीतिमेतः पराः स्वं नो व पामी युः परेम पि ॥३५॥ एकः स्केनसंगम्य परहे वूयां हितं वचः ॥ नववैत्वया कार्ये व तातमोहं हितां हि ते ॥३६॥
मयासं मे च्यपश्चा च नहिंस्याः स विवास्त्वया ॥ मदीयानां च कुपितो मा ते दंडं नि पातयेः ॥३७॥ स्वमस्त्वित्तिनासो मृगेन्द्रेणाभिपूजितः
आसवान्मतिस्ता विद्धं गोमायुर्वाक्यमब्रवीत् ॥३८॥ नं तथा सत्कृतं हृष्टा पज्यमानं स्वकर्मसु ॥ प्राद्विषन्कृत संघाताः पूर्वभृत्या मुहुर्मुहुः ॥
३९॥ भृत्य उवाच ॥ यो स्मान्संतानयित्वा पूजयित्वा प्रसादयेत् ॥ दोषेस्तु संमतो नेतुमैच्छन्नेव भवद्भयः ॥४०॥ अन्यथा च कृताः सर्वे परद्रव्याभि
हारिणाः ॥ अशक्ताः किंचिदादातुं द्रव्यं गोमायुयंत्रिताः ॥४१॥ उत्थानं च विक्रान्तद्विः कथाभिः प्रतिलोभ्यन ॥ अनेन नभ्य रता वै च बुद्धि
रस्य विलोभ्यते ॥४२॥ न वापि समहाप्राज्ञस्तस्मा दैर्याद्ध वालुर ॥ अथास्य समयं कृत्वा विनाशाय न तापरे ॥४३॥ ईप्सितं च मृगेन्द्रस्य मांसं
यत्तत्र संस्कृतं ॥ अपनीय स्वयं तद्धि तैन्यस्तं तस्य वेश्मनि ॥४४॥ यदर्थं चाप्य पहृतं येन तच्चैव मर्षितं ॥ तस्यैतद्धि दितं तत्र वै कारणार्थं च
मर्षितं ॥४५॥ समयोयं कृतस्तेन सा विप्यमुपगच्छता ॥ नोपचात स्त्वया कार्यो राजन्मैत्र मिहेच्छता ॥४६॥ भी उवाच ॥ क्षुधितस्य मृगेन्द्र

१ विपमितं 197

मांस गुणाः ४

पञ्चतन्त्र ४

६७

सम यो: २

आपद्यं ति २

रुजयेयाम हाभाग यथा वार्यान्यथापितृन् ॥२५॥ नत्वेवं मम संतोषाद्रोवनेन्यन्नराधिपं ॥ नकामयेसुखान्भोगानैश्वर्यंवनवद्दाश्वयं ॥
नयोन्दयतिहिमेयोगं नवभक्तैः पुरातनैः ॥ तत्वांविभेदयिष्यंति दुःशीलाश्चमदंतरे ॥२६॥ ननेंऽश्वयः स्त्राह्यनीयोसन्येषामपिभास्वतां ॥
नात्मासुमहाभागः पापकेर्वप्यसात्कृतः ॥२८॥ दीर्घदर्शी महोत्साहः स्थूलवक्ता महाबल ॥ इत्येवामोद्यकृतोस्मि भोग्यैश्च समलंकृतः
२९॥ नस्वल्पेनास्मि संतुष्टो नदुःखाच्च निरुद्विजा ॥ सेवायां वापिना भिज्ञः स्वच्छंदेन वनेचर ॥२९॥ राजोपक्रोशदोषाश्च सर्वे संश्रयवासि
नां ॥ व्रतचर्यां तु निःसंगा निर्भया वनवासिनां ॥३०॥ त्येयमाहूयमानस्य यन्निवृत्तिभयं हृदि ॥ नततिष्ठतितुष्टानां वनमूलफलाशिनां
३१॥ पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरं ॥ विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥३२॥ अपराधं न कुर्वंति भृत्याः शिष्टा नराधि
पैः ॥ उपद्यानैर्यथाभृत्या दूषिता निधनं गताः ॥३४॥ यदि त्वेतन्मया कार्यं मृगेन्द्र यदि मन्यसे ॥ समयं कृत्वा तु मिच्छामि वृत्तिं न च यं यामपि
३३ म टि यामानुनीयास्ते श्रोतव्यं च हितं वचः ॥ कल्पिता या च मे वृत्तिः सा भवेत्त्वयि सुस्थिरा ॥ न रोचयेयं मन्येन संधिं वै सह कर्हिचित् ॥

शृगालस्य शब्दस्यापि १

ऽप्यलौल्यं दोषस्स्वनिपात्यते॥ मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः॥५९॥ उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः॥ मुग्धानां
शुचयो द्वेष्याः कातराणां तरस्विनः॥६०॥ मूर्खाणां पंडिता द्वेष्या दरिद्राणां महाधनाः॥ अधार्मिकाणां धार्मिका द्विरूपाणां सुरूपिणः॥६१
बहवः पंडिता मूर्खा लुब्धा मायोपजीविनः॥ कुर्युर्दोषमदोषस्य बृहस्पतिमतेरपि॥६२॥ शून्ये तत्र गृहे न्यस्तं यद्यप्यपहृतं नव॥
न दृश्यते ह्रियमाणः साधुना वह्निरश्मना॥६३॥ असभ्यास्सभ्यसंकाशाः सभ्याश्चासभ्यदर्शनाः॥ दृश्यन्ते विविधा भावास्तेषु युक्तं परी
क्षणं॥६४॥ नवा न दृश्यते व्योम खद्योतो हव्यवाडिव॥ न चैवास्ति तलं व्योम्नि खद्योते न हुताशनः॥६५॥ तस्मात्प्रत्यक्षदृष्टोऽपि युक्तो
ह्यर्थः परीक्षितुं॥ परीक्ष्य ज्ञापयन्नर्थान्न पश्चात्परितप्यते॥६६॥ न दुष्करमिदं पुंसां व्याजेनाभावितात्परं॥ ख्यापनीयो यशस्स्यो वलो
केप्रभेवतां त्वमा॥६७॥ स्थापितो यं त्वया पूर्वं सामंतेष्वपि विश्रुतः॥ दुःखं वासौ ध्रियते पात्रं धार्यतामेव ते सुहृद्॥६८॥ दूषितं परदोषैर्हि
गृह्यते योन्यथा प्रभुविभ॥ स्वयं संदूषितनामान्यः क्षिप्रमेव विनश्यति॥६९॥ तस्मात्स्वयं महाप्राज्ञो गोमायोः कश्चिदागतः॥ धर्मात्मा तेन वा

शार्दूल उवाच ३

प्रमूरागोः २

१९८

उत्तरम् १

198

स्य भोक्तुर्मेस्युत्थितस्य च ॥ भोजनायोपहर्त्तव्यं तन्मांसं नोपहृस्यते ॥ ४७ ॥ मृगराजेन व्याघ्रं तं दृश्यतां वीर इत्युत ॥ भक्तं कैश्चापि तन्मांसं मृगे
न्द्रायोपवर्णितं ॥ ४८ ॥ स विदेनापनीतं ते विदुर्वा प्राज्ञमानिना ॥ स एष वस्त्व घ शार्दूल श्रुत्वा गोमायुचापलं ॥ ४९ ॥ चक्रे नाम निर्विन्नो राज्ञो
वधं वास्य व्यरोचयत् ॥ छिद्रं तेन तस्य तद्दृष्ट्वा प्रोचुस्ते पूर्वमंत्रिणः ॥ ५० ॥ सर्वेषामेव योऽस्माकं वृत्तिभंगे प्रवर्त्तते ॥ निश्चितैषेवं पुनस्तस्यते
तत्कर्मोप्यवरोचयत् ॥ ५१ ॥ इदं तस्येदृशं कर्म किं तेन न कृतं भवेत् ॥ श्रुतश्च स्वामिना पूर्वं यादृशो नैव तादृशः ॥ ५२ ॥ व्याघ्रो नैरोगेव
धर्मिष्ठः स्वभावेन च दारुणः ॥ धर्मच्छेदी ह्ययं पापो व्याघ्रवीर परिग्रहः ॥ ५३ ॥ कार्यार्थं भोजनार्थं च ब्रतेषु कृतवान् श्रमं ॥ यदि विश्रम्य
पोहैव न ह्येदं दर्शयामते ॥ ५४ ॥ तं मांसं चैव गोमायोस्तत्र गारदागुप्तौ कितं ॥ मांसापनयं ज्ञात्वा व्याघ्रः श्रुत्वा वनद्वचः ॥ ५५ ॥ आज्ञाप्य
माह तदा गोमायुर्वध्यतामिति ॥ शार्दूलस्य वचः श्रुत्वा शार्दूलतनुजस्ततः ॥ ५६ ॥ मृगराजं हितैर्वाक्यैः संबोधयितुमागमत् ॥ पितरेन तत्
त्वच्चयाम्या ह्येरूपैरं भ्रसंयुतं ॥ ५७ ॥ कर्मसंयर्षजैर्देवैर्दूष्येताञ्जुविभिः श्रुतिः ॥ नो छिन्नां सहते कश्चित् ब्रह्मयां वेदिकारकां ॥ ५८ ॥ श्रुवेरपि

८१ स्थापितं ३ २९० है २

उत्तमं २ क१ उभयोः ॥ ज्यध
९:६४

त्वपिवापिवधिष्वासेममोद्वेगोभविष्यति॥८२॥शंकिताश्चमृवृत्तानां परस्परमनुदर्शिनः॥ अस्निग्धाश्चैवदुस्तोषाः कर्म्मैतत इहदुष्करं॥८
३॥ खेनपिलभ्यते भिन्नंश्लिष्टंदुःखेन भिद्यते॥ भिन्नश्लिष्टातुयाप्रीतिर्नसास्नेहेनवर्त्तते॥८४॥ कश्चिदेवहितोभर्तुर्दृश्यतेनपरात्मनः॥ का
र्यापेक्षाहिवर्त्तन्तेभावाः स्निग्धासुदुर्लभाः॥८५॥ सुदुःखंपुरुषज्ञानंचित्तंह्येषांचलाचलं॥ समर्थोवाप्यशक्तोवाशतेष्वेकोधिगम्यते
८६॥ अकस्मात्प्रक्रियान्नृणामकस्माच्चापकर्षणं॥ शुभाशुभेमहत्त्वंचप्रकर्तुंबुद्धिलाघवं॥८७॥ एवंविधंसांत्वमुक्त्वाधर्म्मकामार्थहेतु
मत्॥ प्रसादयित्वाराजानंगोमायुर्वनमभ्यगात्॥८८॥ अगृह्यानुनयंतस्यमृगेन्द्रस्यसबुद्धिमान्॥ गोमायुःप्रायमास्थायत्यक्त्वादेहंदिवंय
यौ॥८९॥ शांतिपर्वणिराजधर्म्मेव्याघ्रगोमायुसंवादः॥११०॥ युधिष्ठिरउवाच॥ किंपार्थिवेनकर्त्तव्यंकिंचकृत्वासुखीभवेत्॥ एतदाच
क्ष्वतत्त्वेनसर्वंधर्मभृतांवर॥१॥ भीष्मउवाच॥ हंततेहंप्रवक्ष्यामिशृणुकार्यैकनिश्चयं॥ यथाराज्ञेहकर्त्तव्यंयच्चकृत्वासुखीभवेत्॥२
नचैवंवर्त्तितव्यंस्मयथेदमनुशुश्रुम॥ उष्ट्रस्यतुमहद्वृत्तंतन्निबोधयुधिष्ठिर॥३॥ जातिस्मरोमहानुष्ट्रःप्राजापत्येयुगेभवत्॥ तपःसु

१९९

193

म नत्ग धं ?

ग॰ स॰ पं॰ ४

स्वातंयथैतत्कपटंस्तुतं ॥७०॥ ततो विज्ञातचारित्रं सत्वश्चार्वापि मोदितः ॥ परिष्वज्यांश्च संसक्तेहं मृगेन्द्रेण पुनः पुनः ॥७१॥ अवास्य यत्नेध
र्म्मिष्टं मृगेन्द्रं शास्त्रवित्तमं ॥ तेन तत्परणसंतुष्टः प्रार्थमासितुमैच्छतं ॥७२॥ शार्दूलस्तं तु गोपुंस्नेहात्फोत्फुल्ललोचनः ॥ अवार्यत्तर्थनिवं
पञ्जयाप्रतिपञ्जयत् ॥७३॥ तं समगेममायुरालोक्य स्नेहाद्गतसंभ्रमः ॥ उवाच शरणो वाक्यं बाष्पगद्गदया गिरा ॥७४॥ पजितोहं त्वया
पर्वेषपथ्वैवविमानितः ॥ परेषामास्पदं नीतो वल्लुनाहाम्पहं त्वयि ॥७५॥ असंतुष्टाश्च भृताः स्थानाद्माना[illegible]प्रोपिताः ॥ स्वयमेवाय
हताभत्या येचाप्युमर्दिताः परैः ॥७६॥ परिन्वीरणाश्चलुब्धाश्च क्रुद्धाभीताः प्रतारिताः ॥ हृतस्वा मानिनो येवत्यक्तादांताश्च ते सवः ॥७७॥
संत्ता पिताश्चये के विश्वास नैश्च प्रतीक्षिणः ॥ अंतर्हिताः सोपहिताः स्तेसर्वेपरसाधनाः ॥७८॥ अवमानेच युक्तस्य स्वात्भ्रष्टस्य वापुनः ॥
कथं वाज्ञोमिविश्वासं सोहं तिष्ठामि वाकयो ॥७९॥ समर्थं मां च संगृह्य स्यापयित्वा परीक्षितः ॥ स्तंतं च समयं भित्वा त्वयास्म्यवमानितः ॥८०
प्रथमं ये समाख्याय शीलवानिति संसदि ॥ नवाच्यं तस्य वैगुण्यं प्रतिज्ञां परिरक्षता ॥८१॥ एवं त्वावमतस्य[illegible]दिष्ट्वा संमैनयास्यसि ॥

घं छित्वा प्रयोगेन नियतेंद्रियः॥ वर्णतस्त्वबुद्धिमूलं तु विजयं मनुरब्रवीत्॥१७॥ बुद्धिश्रेष्ठानि कर्म्माणि बाहुशौर्याणि भारत॥ तानि जंघाजघन्या
नि भारप्रत्यवराणि च॥१८॥ राज्यं तिष्ठति दक्षस्य संगृहीतेंद्रियस्य च॥ आर्त्तस्य युक्तेन मरसौ विजयं मनुरब्रवीत्॥१९॥ परीक्ष्यकारिणो
ह्यर्था स्तिष्ठंतीह युधिष्ठिर॥ सहाययुक्तेन मही कृत्स्ना शक्या प्रशासितुं॥२०॥ इदं हि सद्भिः कथितं विधिज्ञैः पुरा महेंद्रप्रतिमप्रभाव॥ मया पि
वोक्तं नवशास्त्रदृष्ट्या यथैव बुद्ध्या प्रचरस्व राजन्॥२१॥ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे उष्ट्रग्रीवाख्याने॥११२॥ युधिष्ठिर उवा
च॥ राजा राज्यमनुप्राप्य दुर्लभं भरतर्षभ॥ अमित्रस्यातिवृद्धस्य कथं तिष्ठेदसाधनः॥१॥ भीष्म उवाच॥ अत्राप्युदाहरंतीममितिहासं पु
रातनं॥ सरितां चैव संवादं सागरस्य च भारत॥२॥ पुरा युगलयेश्वस्सागरस्सरितांपतिः॥ पप्रच्छ सरितः सर्वाः संशयेतां नरात्मना॥३
सागर उवाच॥ प्रगळुशाखोन्पश्यामि निहतान्कालिनो द्रुमान्॥ युष्माभिरिह पूर्णाभिर्नद्यस्तत्र न वेतसः॥४॥ अकायश्चाल्पसारश्चै
वेतसः कूलजा स्थ वः॥ अवज्ञया वा नीता स्थ किं च वा न न वः कृतः॥५॥ इदं सर्वं श्रोतुमिच्छामि सर्वासामेव वो मतं॥ यथा वेमानि कूल

गुहूर्तं त्रस्तुतद्य तासमताये न चानह २

२००

200

[illegible]

दे.न.२

महद्दानिर्दशरूपे शंसितव्रतः ॥४॥ नयसस्तस्य चोनेयश्रीतिमान भवद्विभुः ॥ वरेण छंदयामास ततस्तैनं पिनाकधृक् ॥५॥ उष्ट्र उवाच ॥ भगवंस्त्वत्प्रसादेन दीर्घग्रीवा भवेदिह ॥ योजनानां शतं साग्रं गच्छामि चरितुं विभो ॥६॥ एवमस्त्विति चोक्तः स वरदेन महात्मना ॥ प्रतिलभ्य वरं स्वं भगात्तु दुष्टस्वकं वनं ॥७॥ स चकारेनदालस्य वरदानात्तु दुर्मतिः ॥ न चेच्छद्धरितुं गन्तुं दुरात्मा कालमोहितः ॥८॥ स कदाचित्प्रसार्यैव तां ग्रीवां शतयोजनां ॥ चचार श्रान्तहृदयो वातश्चागात्ततो महान् ॥९॥ स गुहायां शिरोग्रीवां निधाय पशुरात्मनः ॥ आस्ते तु वर्षमभ्यागात्सुमहद्दतो वमर्जयत् ॥१०॥ अथ शीतपरीताङ्गो जंबुकः क्षुच्छ्रमान्वितः ॥ स्वदारसहितो गुहामाशु प्रविवेश जलार्दितः ॥११॥ स दृष्ट्वा मांसजीवी तु सुभृशं क्षुच्छ्रमान्वितः ॥ अभक्षयत्ततो ग्रीवामुष्ट्रस्य भरतर्षभ ॥१२॥ यदा त्वबुध्यतात्मानं भक्ष्यमाणं स वै पशुः ॥ तदा संकोचने यत्नमकरोद्दुःखितः ॥१३॥ यावदूर्ध्वमधश्चैव ग्रीवां संक्षिपते पशुः ॥ तावत्तेन सदारेण जंबुकेन स भक्षितः ॥१४॥ स हत्वा भक्षयित्वा च तमुष्ट्रं जंबुकस्तदा ॥ विगते वातवर्षे तु निश्चक्राम गुहामुखात् ॥१५॥ एवं दुर्बुद्धिना प्राप्तमुष्ट्रेण निधनं तदा ॥ आलस्यं हन्त वा नुष्ठाम महान्तं दोषमागतः ॥१६॥ त्वमप्येवं वि

दृढिर्भव
६४

कृतं मानो मेषी रुष्यते वायमार्ह वै ॥३॥ विहसंतमुक्तेनेन शयंतमिवातुरं॥ लोके विद्वेषणीवेन्निवृत्तं निपद्यते॥४॥ इतिसंस्ना
घ नीयेनकर्मणा निरपत्रपः॥ इदस्तु को मया कश्चित्तम्भनोजनसंसदि॥५॥ सनत्रब्रीडितः कोम्यजल्पो विनिष्ठते॥ स्नाघनंस्नाघ
नीयेनकर्मणा निरपत्रपः॥६॥ उपेन्द्रितयोयत्नेन ताद्दशः पुरुषाधमः॥ यद्यद्दृयादस्यमतित्तन्न दस्यसरेद्बुधः॥७॥ श्राद्धनोहिप्र
शंसन्वा निंदन्वा किं करिष्यति॥ वनेकाकश्वा वुद्धिर्वास्समानो निरर्थकः॥८॥ यदिवो भि प्रयोगः स्यात्प्रयोगे पापकर्मणः॥ वागे वाद्यो न
वृत्तस्यनद्येवार्थो जिघांसतः॥९॥ निषेके विपरीतमिमर्विष्वे वत्तवेच्च्या॥ मयूर इव कौपीनं नृत्यं संदर्शयन्निव॥१०॥ यस्यवाच्यं न
लोकेस्तिनाकार्यं वापि किंचन॥ वाच्यं न तु प्रसंदध्याच्छुचिः संश्लिष्टकर्मणा॥११॥ प्रत्यक्षगुणवादीयः परोक्षेवापि निंदकः॥ समानव
श्वपंलोके नष्टलोकपरावरः॥१२॥ तादृग्जनशतस्यापि यद्दृशानिर्जुहोति च॥ परोक्षेणापवादीयस्तनाशयतिनन्तरणाद्॥१३॥ त
स्मान्प्राज्ञोजनः सर्वस्ताद्दशं मानवं त्यजेत्॥१४॥ वर्जयेत्साधुभिर्वर्ज्यं सारमेयोमिवंयथा॥१५॥ परिवादंड्डवाणोहि दुरात्मा वै महाजने

Left margin: ..या वा ॥ ...नरस्य तो ...दूषितो न ...तीन्यर्थः ४

Right margin: स्वमात ...ये त ...केविपरीत ...दितु ...२०१ ...ति ...४

कौ॰२

201

र॰ नो मां स॰१

निहित्वा नायांति चैव तस ॥६॥ तत्रश्रारुनदी गंगा वाक्यमुत्तमम् अर्थवत् ॥ हेतुमद्वाक्यमेवार्थं ज्ञानारं सरितां पतिं ॥७॥ गंगोवाच ॥ तिष्ठंत्येते
यथास्थानेन गाश्चैकनिकेतनाः ॥ तेत्यजंति वनं स्थानं प्रातिलोम्यान्न वेतसः ॥८॥ वेतसो वेगमायांतं दृष्ट्वा नमति सत्वरं ॥ सरिद्वेगेषु
निक्रांते स्थानमासाद्य तिष्ठति ॥९॥ कालज्ञः समयज्ञश्च सदा वश्यश्च सद्रुतः ॥ अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः ॥१०॥ मारुतो
दकवेगेन येनमंत्यवनसंति च ॥ अवर्ध्यं पादपा गुल्मा न तेषां तु पराभवं ॥११॥ भीष्म उवाच ॥ यो हि शत्रोर्विवृद्धस्य प्रभोर्वधविनाशने ॥
पूर्वं न सहते वेगं क्षिप्रमेव विनश्यति ॥१२॥ सारासारं बलं वीर्यमात्मनो द्विषतश्च यः ॥ जानन्विचरति प्राज्ञो नेनयेन वशी भवेत् ॥१३॥ ए
वमेव यदा विद्वान्मन्यतेतिबलं रिपुं ॥ संश्रयेद्वैतसीं वृत्तिमेतत्प्रज्ञानलक्षणं ॥१४॥ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे सरित्सागरसं
वादः ॥११३॥ युधिष्ठिर उवाच ॥ विद्वान्मूर्खे प्रगल्भेन मृदुस्तीक्ष्णेन भारत ॥ आक्रुश्यमानः सदसि कथं कुर्यादरिंदम ॥१॥ भीष्म उवाच ॥ श्रू
यतां पृथिवीपालयथैव वार्थो नुगीयते ॥ सदा सुचेताः सहते नरस्येहाल्पमेधसः ॥२॥ अक्रुध्यन्क्रुध्यमानस्य सुकृतं नाम विंदति ॥ दुः

तथापि जितेंद्रियत्वात्रविगुणत्वात् ... सुखं लभते नवेति ... सत्यपि ... भावेन ... 

इन्द्रियाणामनीशत्वात् ... २

वद्धिकरंवयत ॥ अत्रवान्यतरोरेवहितंयत्तद्ब्रवीहिमे ॥४॥ अभिषिक्तोहियोराजाराष्ट्रस्थोमित्रसंवृतः ॥ ससु
तःसमुपेतोवासकथंरंजयेत्प्रजाः ॥५॥ योह्यसन्तुष्टमरुरतिःस्नेहरागवशोद्धतः इन्द्रियाणामनीशत्वादसज्जनवु
भूषकः ॥६॥ तस्योध्रत्याविगुणानांयोतिसर्वेकुलोद्भवाः ॥ नवभ्यत्पफलैरर्थैस्तराजासंप्रयुज्यते ॥७॥ एतन्मेसंशयस्थस्यराजधर्मा
न्सुदुर्विदान् ॥ बृहस्पतिसमोबुद्ध्याभवान्शंसितुमर्हति ॥८॥ शंसितापुरुषव्याघ्रत्वंनःकुलहितेरतः ॥ क्षत्तावैकोमहाप्राज्ञोयो
नःशंसतिसर्वदा ॥९॥ त्वत्तःसुतमिदंसर्वंश्रुत्वाराजमकंटकं ॥ आनृशंस्येवाव्यथंवतनःस्वप्स्याम्यस्सुखं ॥१०॥ कीदृशाःसन्निकर्ष
स्थाभृत्यैःसहगुणान्विताः ॥ किंदृशैःकिंकुलैःसिनेवाप्रदेशैस्यविधीयते ॥११॥ नह्येकोभृत्यरहितोराजाभवतिरक्षिता ॥ राज्यवंतंजनः
सर्वःसत्कुलीनोभिकांक्षति ॥१२॥ भीष्मउवाच ॥ नवप्रशास्तुराज्यंहिशक्यमेकेनभारत ॥ असहायवताताततनैवार्थाःकेचिदच्युत ॥
१३॥ लब्धंलब्ध्वाह्यपिसदारक्षितुंभरतर्षभ ॥ यस्यभृत्यास्ततःसर्वेज्ञानविज्ञानकोविदाः ॥१४॥ हितैषीकुलजःस्निग्धःसराज्यफलमश्नुते

जानऊत्वारीने१

यशौ इव१ दुःखे१

प्रकाशयति दोषांस्तु सर्प्पः फणमिवोच्छ्रितं॥१५॥ तं स्वकर्म्मादितं कुर्वोरगं प्रति कर्त्तुयं इच्छति॥ भस्मकूट इवाबुद्धिः स्वैरो रजसि मज्जति॥१६॥
मनुष्यशाला वृकं मंद्रप्रशांतं जनाय नादेसनतं निविष्टं॥ मातंगमुन्मत्तमिवोन्नदंतं त्यजेत्तं तं श्वानमिवातिरौद्रं॥१७॥ अस्थाद्रिजुष्टे प
थि वर्त्तमानं दंभादुपेतं विजयानुयायं॥ अरिव्रतं नित्यमभूतिकामं धिगस्तु तं पापमतिं मनुष्यं॥१८॥ प्रत्युच्यमानः परिभूय एभिर्निशाम्य
मोऽभूस्त्वमथोत्तरूप॥ उद्वस्य नीचैर्नरकं संप्रयोगं विगर्हयंति स्थिरबुद्धयो ये॥१९॥ क्रुद्धोदशार्हं नरहिताड्यहास्तपांसुभिर्वा विकिरेत्तु सद्भिः॥
विवत्सदंतांश्च विभावयेद्वा सिद्धं हि मूढे कुपितेन खिलं नतत्॥२०॥ विगर्हणां परमदुरात्मनाकृतां सहेतयः संसदि दुर्ज्जनान्नरः॥ पठेदिदं वाप्य
निशं सदुर्न्नरः पञ्चालयं सल्लभतेसदोप्सितं॥२१॥ इति शांतिपर्व्वणि राजधर्म्मे टिट्टिभकं नाम॥११३॥ युधिष्ठिर उवाच॥ पितामह महा
प्राज्ञ संशयो मे महानयं॥ सच्छेत्तव्यस्त्वया राजन्भवान्नः कुलवर्द्धनः॥१॥ पुरुषाणामयं तात दुर्वृत्तानां दुरात्मनां॥ कथितो वाक्यसंचार
स्ततो विज्ञापयामि ते॥२॥ यद्धितं राज्यतंत्रस्य कुलस्य च सुखोदयं॥ आयत्यां च तदात्वे च क्षेमं वृद्धिकरं च यत्॥३॥ पुत्रपौत्राभिरामं च राज

उत्तरकाले१

अभितिष्ठेत

केनानि४

र्वेमास्थितः॥४॥तस्यसदृशसङ्घावमुपाविश्यस्वधीमतः॥सर्वेमत्वासमीपस्थाभवंतिवनचारिणः॥५॥सिंहव्याघ्रगणाः क्रूरामत्ताश्चैववन
नागजाः॥द्वीपिनःखड्गभल्लूकायेवान्येभीमदर्शनाः॥६॥तंसुखप्रश्नराः सर्वेभयनिर्हृतशासनः॥तस्यवंशिष्यवद्भेवनीतास्तेप्रियकारिणः
७॥पृष्ट्वातेसुखंप्रश्नंसर्वेयांतियथागतं॥ग्राम्यकंचसुरवंतत्रतस्तुतेमहामुनिः॥८॥भक्तोनुरक्तःसततमुपवासकृशोर्वदलुः॥फलमू
लोदकाहारीशांतःशिष्टाहुतिर्यथा॥९॥तस्यवैरूपविश्यस्यपादमूलेमहात्मनः॥मनुष्यवज्जतोभावंस्नेहबद्धोभवद्भृशं॥१०॥ततोभ्ययान्म
हाहारीमायावीत्वनभोजनः॥श्वावैर्वान्यंतपश्चयः क्रूरःकालइवांतकः॥११॥लेलिह्यमानस्तृषितःपुच्छास्फोटनतत्परः॥व्यादितास्यःक्षु
धाभग्नःप्रार्थयानस्तदामिषं॥१२॥दृष्ट्वातंक्रूरमायांतंजीवितार्थीनराधिप॥श्वोवाचस्थानमुनिंतत्रतंशृणुष्वदिशांपते॥१३॥श्वशत्रुर्भगवन्न
त्रद्वीपीमांहंतुमिच्छति॥त्वत्प्रसादाद्भयंनस्यादयथापाहिमहामुने॥१४॥तथाकुरुमहाप्राज्ञमनोज्ञस्त्वंनसंशयः॥समुनिस्तस्यविज्ञायभा
वज्ञोभयकारिणं॥१५॥मनज्ञःसर्वसत्वानांज्ञानैश्वर्यसमन्वितः॥मुनिरुवाच॥नभयंद्वीपिनःकार्यंमृत्युतस्तेकथंचन॥१६॥मत्तस्वंपर

(left margin) दुःप्रापं

(right margin) २०३
स्वःपतीनः१

मंत्रिणोयस्यकुलजा असंहार्याःसहोषिताः॥१५॥नृपतेर्मतिदाःसंतःसंबंधज्ञानकोविदाः॥अनागतविधातारःकालज्ञानविशारदाः॥१६॥
अतिक्रांतमशोचंतःसराज्यफलमश्नुते॥समदुःखसुखायस्यसहायाःप्रियकारिणः॥१७॥अर्थचिंताःपराःसत्याःसराज्यफलमश्नुते॥यस्य
नाभितिजनःसर्वःसन्निकर्षगतःसदा॥१८॥अक्षुद्रःसत्पथाचारःसराजाराज्यभाग्भवेत्॥कोशाख्यंपरलंयस्यकोशवृद्धिकरैर्नरैः॥१९॥आप्तैः
तुष्टैश्चसततंचीयतेसनृपोत्तमः॥कोष्ठागारमसंहार्यैराप्तैःसंचयतत्परैः॥२०॥पात्रभूतैरलुब्धैश्चपाल्यमानोगुणीभवेत्॥व्यवहारश्चन
गरेयस्यकर्मफलोदयः॥२१॥दृश्यतेशंखलिखितःसधर्मफलभाङ्नृपः॥संगृहीतमनुष्यश्चयोराजाराजधर्मवित्॥२२॥षड्वर्गंप्रतिगृह्ण
निसधर्मफलमश्नुते॥इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मे॥१२४॥भीष्मउवाच॥अत्राप्युदाहरंतीममितिहासंपुरातनं॥निदर्शनं
परंलोकेसज्जनाचरितंसदा॥१॥अस्यैवार्थस्यसदृशंयच्छ्रुतंमेतपोवने॥जामदग्न्यस्यरामस्ययदुक्तमृषिसत्तमैः॥२॥वनेमहतिकस्मिंश्चिद
मनुष्यनिषेविते॥ऋषिर्मूलफलाहारोनियतोनियतेंद्रियः॥३॥दीक्षादमपरःशांतःस्वाध्यायपरमःशुचिः॥उपवासविशुद्धात्मासततंस

Margin, left: आदिसा... ४

Margin, right: ...पहि

अथ व[illegible]मानेऽन्नमाः[illegible]मस्यानेपून्नमा
[illegible]यो[illegible]ज्याः नतूचस्थाने नीचा निये

तोयं वदद्भवः ॥४॥ ततः कमलखंडानि शल्लकीगहनानि च ॥ व्यचरत्स सुदा युक्तः पद्मरेणुविभूषितः ॥५॥ कदाचिद्दमागास्तु हस्तिनः सं
मुरे तदा ॥ अजलस्थो जलस्थस्य कालेन बलीयसा ॥६॥ क्रियाजगाम तद्देशं केशरी केशरानुगः ॥ गिरिकंदरतो भीमः सिंहो नागकुलां ग२
तकः ॥७॥ तं दृष्ट्वा सिंहमायांतं नागः सिंहभयार्दितः ॥ अविशच्छरणं भीतो वेपमानो भयातुरः ॥८॥ अहन्त सिंहं तं जीतो नागेंद्रो मुनिं नतः
तदा ॥ वन्यं नागराजं त्वं सिंहं तुल्यजातिसमन्वयात् ॥९॥ दृष्ट्वा वंसो भवान्सिंहो वन्यो भयसमन्वितः ॥ स चाश्रमे वसत् सिंहस्तस्मिन्नेव महा
वने ॥१०॥ तद्भयात्पशवो नान्ये तपोवनसमीपतः ॥ व्यदृश्यंत तदा त्रस्ता जीविताकांक्षिणस्तथा ॥११॥ कदाचित्कालपाशेन सर्वप्राणिवि
हिंसकः ॥ वनवासजनाहारो नानासत्त्वभयंकरः ॥१२॥ अष्टपादूर्ध्वनयनः शरभो वनगोचरः ॥ तं सिंहं हंतुमागच्छन्मुनेस्तस्य निदेशतः
१३॥ तं मुनिः शरभं चक्रे बलोत्कटमरिंदमं ॥ ततः स शरभो वन्यो मुनिः शरभमागतः ॥१४॥ दृष्ट्वा बलिनमत्युग्रं सिंहस्तं प्राद्रवद्वनात् ॥ स च २०४
वं शरभस्थाने संन्यस्तो मुनिना तदा ॥१५॥ मुनेः पार्श्वगतो नित्यं शरभः सुखमाप्तवान् ॥ ततः शरभसंत्रस्ताः सर्वे मृगगणास्तदा ॥१६॥ दिशः

204

हस्ती १ मुनिना १

स्तितोद्वीपीभवसिपुत्रक॥ततश्चद्वीपितांनीतोगजनिभाद्युतिः॥१७॥विशांगोविस्फुरद्दंष्ट्रोवनेवसतिनिर्भयः॥तंदृष्ट्वासंस्मरेद्वीपीआत्म
नःसहस्रंपकः॥१८॥अभिरूपंततस्तस्यन्त्ररोनसमपद्यत॥ततोऽभ्ययान्महारौद्रोव्यादितास्यःक्षुधान्वितः॥१९॥द्वीपिनंलेलिहद्वक्त्रोव्या
घ्रोरुधिरलालसः॥व्याघ्रंदृष्ट्वाक्षुधाविष्टंदंष्ट्रिणंवनगोचरं॥२०॥द्वीपीजीवितरक्षार्थमृषिंशरणमेयिवान्॥तंवीतभयंदृष्ट्वाऋषिराकु
र्व्वनानद॥२१॥सद्वीपोव्याघ्रतांनीतोद्वीपिराण्वलवत्तरः॥ततोदृष्ट्वासशार्दूलोव्याल्सरंतंविशांपते॥२२॥सतुक्षुत्वाव्याघ्रतांप्राप्यबलवान्
पिशिताशनः॥नमूलफलभोगेषुस्पृहामप्यकरोत्तदा॥२३॥यथामृगपतिर्नित्यंप्रकांक्षतिवनौकसः॥तथैवसमहाराजव्याघ्रोर्थ्यंभ
वत्तदा॥२४॥इतिश्रीमहाभारतेशांतौराजधर्मेऋषिसंवादे॥११५॥भीष्मउवाच॥व्याघ्रश्चोरजमूलस्यःसुरवंसुप्तोहतैर्मृगैः॥गजश्चाग
तमुद्देशंमत्तोमेघइवोत्थितः॥१॥प्रभिन्नकरटःप्रांशुःपद्मीविततकुंभकः॥सुविषाणोमहाकायःप्रांशुस्कंधःसुविक्रमः॥२॥तंदृष्ट्वाकुंजरं
मत्तमायातंवलगर्वितं॥व्याघ्रोहस्तिभयात्त्रस्तस्तमृषिंशरणंययौ॥३॥ततोऽनयत्कुंजरत्वंव्याघ्रंतमृषिसत्तमः॥महामेघनिभंदृष्ट्वासभी

२. व्याघ्र २ ६२

सैन्याव
कार्ये
पू. ताः ४

र्ति। अकुलीननराकीर्णो न राज्ञः सुखमेधते ॥४॥ कुलजः प्रकृतो राज्ञा स्वकुलीनतया सदा। न पापे कुरुते बुद्धिं भिद्यमानोऽप्यनागसि ॥५॥
अकुलीनस्तु पुरुषः प्राकृतोऽसाधुसंश्रयः। दुर्लभैश्वर्यतां प्राप्तो निंदितः शत्रुतां व्रजेत् ॥६॥ कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगं ॥ स
र्वेषां स्वार्थतत्त्वज्ञं सहिष्णुं देशकालयोः ॥७॥ कृतज्ञं बलवंतं च क्षांतं दांतं जितेंद्रियं ॥ अलुब्धं लब्धसंतुष्टं ज्ञातिभृत्यसुहृत्सदा ॥ नास्तविवं दे
शकालज्ञं न दीनं संग्रमे रतं ॥ सर्वज्ञं युक्तमनसं हिते विगतमन्दितं ॥९॥ युक्ताचारं स्वविषये संधिविग्रहकोविदं ॥ राज्ञस्त्रिवर्गवेत्तारं पौ
रजानपदप्रियं ॥१०॥ खातकव्यूहतत्त्वज्ञं बलहर्षणकोविदं ॥ इंगिताकारतत्त्वज्ञं यात्राज्ञानविशारदं ॥११॥ हस्तिशिक्षासु तत्त्वज्ञमहंकार
विवर्जितं ॥ प्रगल्भं दक्षिणं दांतं बलिनं युक्तकारिणं ॥१२॥ चौक्षं चौक्षजनाकीर्णं सुमुखं च सुदर्शनं ॥ नायकं नीतिकुशलं गुणैश्चैव हि स
मन्वितं ॥१३॥ अस्तब्धं प्रश्रितं श्लक्ष्णं मृदुवादिनमेव च ॥ धीरं शूरं महर्द्धिं च देशकालोपपादकं ॥१४॥ सचिवं यः प्रकुरुते न चैनमवमन्यते ॥
तस्य विस्तीर्यते राज्यं ज्योत्स्ना ग्रहपतेरिव ॥१५॥ एतैरेव गुणैर्युक्तो राजा शास्त्रविशारदः ॥ एष्टव्यो धर्मपरमः प्रजापालनतत्परः ॥१६॥

२०५

संशद्रवतुराजन्भयाज्जीवितकांक्षिणः॥शरभोप्यतिसंहृष्टोनित्यंपारिवधेरतः॥१७॥कौतुकेनमयानीतोनानावेषुश्वयोनितः॥फलमू
लाशनंकर्तुंनैच्छत्सपिशिताशनः॥१८॥ततोरुधिरतर्षेणबलिनाशरभोन्वितः॥इयेषहन्तुंमुनिंहन्तुमकृतज्ञःश्वयोनिजः॥१९॥ततःस्तेन
तपःशक्त्याविदितोज्ञानचक्षुषा॥विज्ञायसमहाप्राज्ञोमुनिःश्वानंतमुक्तवान्॥२०॥श्वानंद्वीपित्वमापन्नोयोद्वीपोव्याघ्रतांगतः॥व्या
घ्रोनागोमदपटुर्नागःसिंहत्वमागतः॥२१॥सिंहःस्वबलमापन्नोभूयःशरभतांगतः॥मयात्वंद्वीपिरूपेणविसृष्टोनकुलान्वयः॥२२॥य
स्मादेवंमयागुप्तःसर्वान्हिंसितुमिच्छसि॥तस्मात्स्वयोनिमापन्नःश्वैवत्वंहिभविष्यसि॥२३॥ततोमुनिजनद्वेषीदुष्टात्माप्राकृतोबुधः॥ऋ
षिणाशरभःशप्तोतद्रूपंपुनरागमत्॥२४॥इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेश्वर्षिसंवादे॥११६॥भीष्मउवाच॥सश्वाप्रकृतिमाप
न्नःपरंदैन्यमुपागतः॥ऋषिणाहुंकृतःपापस्तपोवनबहिःकृतः॥१॥स्वंराज्ञागतिमताविदित्वासचिवंसदा॥आर्जवंप्रकृतिंसत्त्वंश्रुतवृत्त
[illegible]संमेदं॥अनुक्रोशंबलंवीर्यंप्रभावंप्रश्रयंक्षमां॥भृत्यायेयत्रयोग्याःस्युस्तत्रस्थाप्याःसुरक्षिताः॥२॥नापरीक्ष्यमहीपालस्सचिवंकर्तुम

स्त्नु॰ शौ॰ शं॰ १

१ एवं शीवान् संनीवे नैधौ जयेत्। विपरीते दोषभाक् २

तिपर्व णिराजधर्मेश्वार्षिसंवादः॥११८॥भीष्म उवाच॥एवं शुभस्तमान्भृत्यान्स्वेस्वेस्थानेनराधिपः॥ नियोजयति कृत्येषु सराज फलमश्नु
ते॥१॥नश्वास्वंस्थानमुत्क्रम्यप्रमाणमभिसत्कृतः॥आरोप्यःश्वास्वकात्स्थानादुत्क्रम्यान्यत्प्रपद्यते॥२॥स्वजातिगुणसंपन्नाःस्वेषुकर्मसु
संस्थिताः॥प्रकर्तव्याबुधाभृत्यानास्थानेप्रक्रियाक्षमाः॥३॥अनुरूपाणिकर्माणिभृत्येभ्योयःप्रयच्छति॥सोभृत्यगुणसंपन्नोराजाफलमुपा
श्नुते॥४॥शरभःशरभस्थानेसिंहःसिंहइवोर्जितः॥व्याघ्रोव्याघ्रइवस्थाप्योद्वीपीद्वीपीयथातथा॥५॥कर्मस्विहानुरूपेषुन्यस्याभृत्यायथा
विधि॥प्रतिलोमंनभृत्यास्तेस्थाप्याःकर्मफलैषिणा॥६॥यःप्रमाणमतिक्रम्यप्रतिलोमंनराधिप॥भृत्यान्स्थापयतेबुद्धिर्नसरंजयतेप्र
जाः॥७॥नबालिशानचक्षुद्रानाप्राज्ञानाजितेंद्रियाः॥नाकुलीनानराःसर्वेस्थाप्यागुणगणैषिणा॥८॥साधवःकुलजाःशूराज्ञानवंतो
नसूयकाः॥अक्षुद्राःशुचयोदक्षाःस्युर्नराःपारिपार्श्वकाः॥९॥न्यग्भूतास्तत्पराःशांताश्चौक्षाःप्रकृतिजेःशुभाः॥स्वस्थानानुपह्वष्टायेतेस्यु
राज्ञांवहिश्चराः॥१०॥सिंहस्यसततंपार्श्वेसिंहएवानुमोदते॥असिंहःसिंहसहितःसिंहवल्लभतेफलं॥११॥यस्तुसिंहःश्वभिःकीर्णः

दासभूताः २

न २

फ० १२९ ३

नयत्रहितां ज २

२०६

२०६

धीरोमर्षी स्तुविख्यातो न्ताः कालेपुरुषकारवित् ॥ शुश्रूषुः श्रुतवान् श्रोता ऊहापोहविशारदः ॥१७॥ मेधावी धारणाशक्तो यथान्यायोपपादकः ॥
दांतः सदा प्रियाभाषी क्षमावांश्च विपर्यये ॥१८॥ दानशीलः स्वयंकारी स्वदयालुः सुखदर्शनः ॥ आर्त्तहस्तप्रदो नित्यमाप्तामात्यो हि हितरतः ॥१९॥
नाहंवादी न निर्द्वन्द्वो न यत्किंचित्कारकः ॥ कृते कर्मण्यमात्यानां कर्त्ता भक्तजनप्रियः ॥२०॥ संगृहीतजनो लब्धः प्रसन्नवदनः सदा ॥ सदाभृ
त्यजनापेक्षी नक्रोधी सुमहामनाः ॥२१॥ युक्तदण्डो न निर्द्वन्द्वो धर्मकार्यानुशासनः ॥ चारनेत्रः प्रजावेक्षी धर्मार्थकुशलः सदा ॥२२॥ राजा गुण
शताकीर्ण एष्टव्यस्तादृशो भवेत् ॥ योधाश्चैव मनुष्येन्द्र सर्वैर्गुणगणैर्वृताः ॥२३॥ अन्वेष्टव्याः सुपुरुषाः सहा राज्यस्य धारणे ॥ नावमान्याश्च
स्ते राज्ञा वृद्धिमभीप्सता ॥२४॥ योधाः समरशौण्डीराः कृतज्ञाः शस्त्रकोविदाः ॥ धर्मशास्त्रसमायुक्ताः पदातिजनसंयुताः ॥२५॥ अभया गजपृष्ठ
स्था रथचर्याविशारदाः ॥ इष्वस्त्रकुशला यस्य तस्येयं नृपतेर्मही ॥२६॥ सर्वसंग्रहणे युक्तो नृपो भवति यः सदा ॥ उत्थानशीलो मित्राढ्यः
स राजा राजसत्तमः ॥२७॥ शक्या चाश्वसहस्रेण वीरारोहेण भारत ॥ संगृहीतमनुष्येण कृत्स्ना जेतुं वसुंधरा ॥२८॥ इति श्रीमहाभारते शां

उत्तराशांते ... [illegible]
संधिविग्रहकोविद ... [illegible]

पुविग्रहः

टत्यांर

मयूरः ३

पप्रदत्वं २

तद्यथा रक्षणं कुर्यात्तथा स्वराष्ट्र महीपते ॥३॥ तथा वर्णाश्रमि विज्ञाश्रि विभर्त्ति भुजगाशन ॥ तथा दृष्ट्वा धिराजानयं कुर्वीत धर्म्मवित् ॥४॥
तैस्त्रां जेतं मध्यागे भंसत्यमार्जवमेव च ॥ मध्यस्थः यत्नमातिष्ठन्नस्तथा वै सुखमश्नुते ॥५॥ यस्मिन्नर्थे हितं यत्स्यात्तद्राज्ञा नृपमादिशेत्
वक्तुं नृपस्य राज्ञो हि सम्यग्धर्मोपर्यो न सीदति ॥६॥ नित्यं रक्षितमंत्रः स्यात् यथा मूकः शरद्धिखी ॥ एवं सम्यग्न्यस्तानुगीत्र्यां नेतु विशारदः ॥
७॥ आपद्द्वारेषु भेदः स्यात् ज्ञलप्लवगो छिद्र ॥ शैलवर्षोद्र नीवनादिना निभवंति हि ॥८॥ नहि द्वाजापराधेषु नीत्या मार्गं प्रदर्शयेत् ॥ नार्थ
कामौ धर्म्मेव च कुर्यात् धर्म्मध्वजो यथा ॥९॥ अर्थकामः शिखो वा जो कुर्याद्धर्मध्वजो यथा ॥ नित्यमुद्यतदंडः स्यात् दाव्येद प्रमादतः ॥१०॥ लो
कैर्वीर्यव्ययो हृष्टा वरहन्त्तमिव स्ववत् ॥ प्रजावान्न वृषपिषु भौमानि वरगोः क्षिपेत् ॥ जातपक्षः परिस्पंदेत्ये स्थितास्तन ॥ दो
षान्विवृणुयाच्छन्नः परपक्षीन्विधूनयेत् ॥१२॥ कानने विवपुष्पाणि व हिर्याः समीकरन् ॥ उच्छिन्नाशायन्स्फीतान्नरेंद्रान्नेव लो
पमान् ॥१३॥ स्वच्छायामाश्रितान्सर्वान्वृत्तिकारणमाश्रयेत् ॥ स्वयेन्छायामविज्ञातं गुप्तसंवरणमाश्रयेत् ॥ नवसत्त्वसं ज्ञात्वा स्विन्ना

वौः ३ तालवन्तं ३ शुद्धि २ मत्स्यानि [illegible] ३



२०७

मृगयादिव्याजात् पञ्चाङ्ग विद्वन्वेत् २

सिंहकर्म्मफलेरत॥ नसर्सिंहफलंभोक्तुंशक्तःस्वैभिरुपासितः॥१२॥ एवमेवनरेंद्रस्त्वशूरैःप्राज्ञैर्वहुश्रुतैः॥ कुलीनैःसहशक्नोतिकृत्स्नांजेतुंवसुं
धरां॥१३॥ नाविद्योनानृजुःपार्श्वेनाप्राज्ञोनामहाधनः॥ संग्राह्योवसुधापालैर्भृत्योभृत्यवतांवर॥१४॥ वाणवद्विसृतायांतिस्वामिकार्य
परानराः॥ येभृत्याःपार्थिवहितास्तान्सांत्वेनप्रयोजयेत्॥१५॥ कोषश्चसततंरक्ष्योयत्नमास्थायराजभिः॥ कोषभूताहिराजानःकार्यसिद्धि
कराभवत्॥१६॥ कोष्ठागारंचतेनित्यंस्फारैर्धान्यैःसुसंवृतं॥ शिवास्तुसन्तुसंन्यस्यधनधान्यपराभव॥१७॥ नृवमकाश्चतेभृत्याभवंतुरणकोवि
दाः॥ वाहिनांचप्रयोगेपिवैशारद्यमिहेष्यते॥१८॥ ज्ञातिबंधुजनावेक्षीमित्रसंबंधिसंवृतः॥ पौरकार्यानुजापीचभवकौरवनंदन॥१९॥
एषातेनैष्ठिकीवुद्धिःप्रजासुविहितामया॥ शुभोनिदर्शनंतातकिंभूयःश्रोतुमिच्छसि॥२०॥ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्म्मे
श्वर्षिसंवादः॥११८॥ युधिष्ठिरउवाच॥ राजवृत्तान्यनेकानितवयाप्रोक्तानिभारत॥ पूर्वैःपूर्वनियुक्तानिराजधर्म्मार्थवेदिभिः॥१॥ नर
विस्तरेणोक्तंपूर्ववृत्तंसतांमतं॥ प्रणेयंराजधर्म्माणांप्रब्रूहिभरतर्षभ॥२॥ भीष्मउवाच॥ रक्षणंसर्वभूतानामितिक्षात्रंपरंमतं॥

स्ववार्थं नैव प्रहस्तवर्यो ॥२७॥ धर्म्मारम्भे विरोधेन सर्वेषां प्रियमाचरेत् ॥ समाश्रितिराजा यः सपर्वत इवाचलः ॥२८॥ सदस्यायं समाधाय स्
पौरश्म निवार्यतान् ॥ धर्म्ममेवाभिरक्षेन लब्ध्वा तुल्ये प्रियाप्रिये ॥२९॥ मूलप्रहतिदेशीयं धर्म्मं ज्ञात्वा रहु भाविराः ॥ मध्येवयस्तिनिर्दिष्टान्
हिनेयुक्तानधिक्रियान् ॥३०॥ अलुब्धांश्चितान्रां नानृ धर्म्मेषु परिनिष्ठितान् ॥ स्थापयेत्सर्वकार्येषु राजा धर्म्मार्थरक्षिणः ॥३१॥ एतेन बंधका
रेणावसुनामागतागतिं ॥ युक्तः समनुतिष्ठेत तुष्टश्चारैरपरस्तुतः ॥३२॥ अमायको निरुद्धश्च स्वयं कुर्याद्देवित ना ॥ काम्यत्स्यक्रोश स
वसुदेववसुंधरा ॥३३॥ व्यक्तश्चानुग्रहो यस्य व्यक्तश्चापि निग्रहः ॥ गुप्तात्मा गुप्तराष्ट्रश्च स राजा राजधर्म्मवित् ॥३४॥ नित्यं राष्ट्रं सुरक्ष
न्गोभिः सूर्य इवोदितः ॥ चरान्स्वानुचरान्विद्यान्तथा बुद्ध्या स्वयं चरेत् ॥३५॥ कालं प्राप्तमुपादद्यान्नार्थं राजा प्रसूचयेत् ॥ अहन्यहनि सं
दुह्यान्नदीं गामिव बुद्धिमान् ॥३६॥ यथा क्रमेण पुष्पेभ्यश्चिनोति मधु षट्पदः ॥ तथा द्रव्यमुपादाय राजा कुर्वीत संचयं ॥३७॥ यद्धि गुप्ताव
शिष्टं स्यात्तद्वित्तं धर्म्मकाम्ययोः ॥ संचयान्न विसर्जीयाद्राजा शास्त्रविदात्मवान् ॥३८॥ नार्थमल्पं परिभवेन्नावमन्येत शत्रवान् ॥ बुद्ध्या

शंदिविंतयेत्॥१५॥ रुषीवासितग्रीवो भुंक्ते न निशि निर्भरे॥१६॥ मायूरेणगुणेनैवं स्वयं राजा समाचरेत्॥ न जलाद्विनतु न चारणं रक्तो दम्मानेना
न्मंना॥१६॥ चोरभूमिश्च भिमनानूपांशांश्च परिवर्जयेत्॥ प्रारणायद्वाशांतभूमिंप्ररणाख्येन न संशयः॥१७॥ हंस्योहुध्याविवादिनां नृशंकाप्राज्ञ
नूनयोंहितान्॥ वासयेद्रत्नवर्णोगोसैन्यमपि च वासयेत्॥१८॥ सदावृंहिंनिभःकामं प्रशास्तं हनमाचरेत्॥ सवंजम्बादस्वैत्रांयानंगंगहने
ष्विव॥१९॥ एवं मयूरवद्राजा स्वराज्यं परिपालयेत्॥ आत्मवत्निकरीनीतिं विवधीन विद्वन्नराः॥२०॥ आत्मानुयंमनंबुद्ध्यापरबुद्ध्याविधार
णं॥ बुद्धावात्मगुणप्राप्तिरेतछास्त्रनिदर्शनं॥२१॥ परं विश्वासयेत्साम्नास्वशक्तिंचोपलक्षयेत्॥ आत्मनः परिमयेणबुद्धिं बुद्ध्या विचारयेत्॥२२
सान्त्वयोगमतिप्राज्ञः कार्याकार्यप्रयोजकः॥ निगूढबुद्धे धीरस्य वक्तव्ये वाहितं तथा॥२३॥ स निहत्यांकथांप्राज्ञो यदि बुद्ध्या बृहस्पतिः॥ स्वभा
वमेष्यते न संस्कृत्याय समिवोदके॥२४॥ अनुपुंजीत हत्यानि सर्वाण्येवमहीमतिः॥ आगमेरुपदेशानि स्वस्यैवदुपरस्य तु॥२५॥ मृदु शीतलं
तथा प्रतंश्ररं चार्थविधानवित्॥ स्वकर्मणि नियुंजीत ये चान्ये बलाधिकाः॥२६॥ अथ हष्टान्नियुक्तानि स्वानुरूपेषु कर्मसु॥ सर्वाने वं स्माद

विधान जं दैव प्रा पृ । नाऊ चर्मी तो न ष्ठा सायाः र्थी सर्वो नुरूपतीत्य र्थः

नं २ ३

सायप्रभृतौ ॥ यज्ञासते मतिमं तो मनस्विनः शक्रो विष्णुर्यवस्तरस्वतीव ॥ वसंति भूता नि वपत्र नित्यं तस्मा द्विद्वान्नावमन्येत देहं ॥ ४९ ॥
उद्धं हन्यान्तं प्रदानेन नित्यं लुब्धस्तुष्टिं परवित्तस्य नेति ॥ सर्वो लुब्धः कर्मगुणोपभोगे योऽर्थहीनो धर्मकामौ जहाति ॥ ५० ॥ धनं भागं
नेदारं समृद्धं स बुद्धं लुब्धः प्रार्थयते सदैव ॥ लुब्धेदोषाः संभवं तीह सर्वे तस्मान्नृपो न प्रगृह्णीत लुब्धं ॥ ५१ ॥ संदर्शने न पुरुषं जघन्यमपि चोद
येत् ॥ आरंभं वर्द्धते प्राज्ञः सर्वार्थांश्च प्रसूदयेत् ॥ ५२ ॥ धर्मान्वितेषु विज्ञाता मंत्रीगुप्तश्च पांडव ॥ आसो राजकुलीनश्च पर्याप्तो राजसंग्रहे
५३ ॥ विधिप्रयुक्तान्नरदेवधर्मानुक्तान्समासेन निबोध बुध्या ॥ धर्मान्विद ध्याद्यस्तु यो वै राजा महीं पालयितुं स शक्तः ॥ ५४ ॥ अनी
तिजं यस्य विधानजं सुखं हन्त प्रणीतं विधिवत्प्रदुष्यते ॥ न विद्यते तस्य गतिर्महीक्षितो न चापि विद्यते राजसत्तमम् ॥ ५५ ॥ धनैर्विशिष्टान्मतिशी
लपूजितान्गुणोपपन्नान्युधि दृष्टविक्रमान् ॥ गुणेषु दृष्टानचिराजितात्मवान्मतो ऽभिसंस्थाप्य निरुन्ति राज्यवान् ॥ ५६ ॥ पश्ये हृष्टा वा विवि
विधैः क्रियापथैर्न चानुपायेन भवितेति भाषते ॥ श्रियं विशिष्टां विपुलं यशो धनं न दोषदर्शी पुरुषः समश्नुते ॥ ५७ ॥ श्रीतिप्रदत्तो विनि

२०८

दूपानं २

२०९

नुबध्येदात्मानं नवाबुद्धिषु विश्वसेत्॥३९॥धृतिर्दान्तं संयमो बुद्धिरात्मा धैर्यं शौर्यं देशकालाः प्रमादः॥अल्पस्य वा बहुनो वा विवृद्धौ धनस्यैतान्य
ष्टसमिंधनानि॥४०॥अग्निस्तोको वर्द्धते धोज्य मानो वीजं चैकं रोहसहस्रमेति॥आयव्ययौ विपुलौ सन्निशाम्य न तस्मादल्पं नावमन्येत वित्तं॥
४१॥बालोप्यबालः स्थविरो रिपुर्यः सदाप्रमत्तं पुरुषं निहन्यात्॥कालेनान्यस्तस्य मूलं हरेत कालज्ञानां पार्थिवानां वरिष्ठः॥४२॥हरेत्कीर्ति
धर्म्ममस्योपरुध्याद्दर्पं दोर्वीर्यमस्योपहन्यात्॥रिपुर्द्वेष्टा दुर्बलो वा बलो वा तस्माच्छत्रौ नैव हीयेद्युधानः॥४३॥क्षयं वृद्धिं पालनं संचयं वा बुध्यापु
भौ संहतौ सर्वकामौ॥ततश्चासौ मतिमान् संदधीत तस्माद्राजा बुद्धिमत्यन्वयेन॥४४॥बुद्धिर्दीप्ता बलवन्तं हिनस्ति बलं बुद्ध्या पाल्यते वर्द्धमानं
शत्रुर्बुद्ध्या सेव्यते वर्द्धमानो बुद्धेः पश्चात्कर्मयत्तत्प्रशस्तं॥४५॥सर्वान्कामान्कामयते हि धीरः सत्त्वेनाल्पेनापि न हीनदोषः॥यस्त्वात्मानं प्रा
र्थयते र्थमानैः श्रेयः पात्रं परयते न नाल्पं॥४६॥तस्माद्राजा प्रगृहीतः प्रजासु मूलं लक्ष्म्याः सर्वशो ह्याददीत॥दीर्घं कालं ह्यपि पीड्यमानो
विद्युत्संपातमिव नो र्जितं स्यात्॥४७॥विद्यातपो वा विपुलं धनं वा सर्वं ह्येतद्व्यवसायेन शक्यं बुध्यायत्तं तन्निवसेद्देहवत्सु तस्माद्विद्याद्व्यव



न हादि

दीप्रमानं

अथवा ता[illegible]मनः राज्ञः तस्य धर्मस्य लोपः कथं केन प्रकारेण न स्यात् तस्य प्रकारो व्यवहारः विगतः

नी२ कुह:४ दंडएवदंडनवचनात् धर्मशब्देन व्यवहारशब्देन वोच्यते

इत्यर्थः २

तस्य लोपः कथं न स्याल्लोकेवहितात्मनः ॥ इत्येव व्यवहारस्य व्यवहारत्वमिष्यते ॥१०॥ अपिचैतत्पुरा राजन्मनुना प्रोक्तमादितः ॥ सु
प्रणीतेन दंडेन प्रियाप्रियसमात्मना ॥११॥ प्रजा रक्षति यः सम्यक् धर्म एव स केवलः ॥ यथोक्तमेतद्वचनं प्रागेव मनुना पुरा ॥१२॥ यन्म
योक्तं मनुष्येषु ब्रह्मणो वचनं महत् ॥ प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः ॥१३॥ व्यवहारस्य चाख्यानाद्व्यवहार इहोच्यते ॥ दंडे त्रिवर्गः
सततं सुप्रणीते प्रवर्तते ॥१४॥ दैवं हि परमो दंडो रूपतो ग्निरिवोत्थितः ॥ नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ अष्टपान्नैकनय
नः शंकुकर्णोर्द्ध्वरोमवान् ॥१५॥ जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुछदः ॥ एतद्रूपं बिभर्त्युग्रं दंडो नित्यं दुराधरः ॥१६॥ असिर्धनुर्गदा श
क्तिः त्रिशूलं मुद्गरः शरः ॥ मुशलं परशुश्चक्रं पाशो दंडर्ष्टितोमराः ॥१७॥ सर्वप्रहरणीयानि संति यानी ह कानि चित् ॥ दंड एव स सर्वात्मा लो
के चरति मूर्तिमान् ॥१८॥ भिंदन् छिंदन् रुजन् कृंतन् दारयन् पाटयंस्तथा ॥ घातयन्नभिधावंश्च दंड एव चरत्युत ॥१९॥ असिर्विशसनो धर्मस्ती
क्ष्णवर्त्मा दुराधरः ॥ श्रीगर्भो विजयः शास्ता व्यवहारः प्रजागरः ॥२०॥ शास्त्रं ब्राह्मणमंत्राश्च शास्ता प्राग्वदतां वरः ॥ धर्मपालो क्षरो देवः

दंडव्यवहारः २

केविन्मान
[illegible]
[illegible]
[illegible]
[illegible]
नेनप
२१०

वर्त्तिनोयथासुहृत्सुविज्ञायनिवृत्तोभयो॥यदेवाधिकंगुरुभारमावहेत्तदेवसुस्निग्धमुदाहरेद्बुधः॥५८॥एतान्मयोक्तान्नरराजधर्मान्नृ
णांचगुप्त्यैमतिमादधस्त्वं॥अवाप्स्यसेपुण्यफलंसुखेनसर्वोहिलोकान्नृपधर्म्ममूलः॥५९॥इतिश्रीमहाभारतेशांतिपर्वणिराज
धर्मे॥१२०॥युधिष्ठिरउवाच॥अयंपितामहेनोक्तोराजधर्म्मःसनातनः॥ईश्वरश्चमहादंडोदंडेसर्वंप्रतिष्ठितं॥१॥देवतानामृषी
णांचपितॄणांचमहात्मनां॥यक्षरक्षःपिशाचानांसाध्यानांचविशेषतः॥२॥सर्वेषांप्राणिनांलोकेतिर्यग्योनिनिवासिनां॥सर्वव्यापी
महातेजादंडःश्रेयानितिप्रभो॥३॥इत्येवमुक्तंभवतादंडेवैसचराचरं॥पश्यतांलोकपालानांससुरासुरमानुषं॥४॥एतदिच्छाम्यहंज्ञातुं
तत्त्वेनभरतर्षभ॥कोदंडःकीदृशोदंडःकिंरूपःकिंपरायणः॥५॥किमात्मकःकथंभूतःकथंमूर्तिःकथंप्रभो॥जागर्तिचकथंदंडःप्रजास्ववहि
तात्मकः॥६॥कश्चपूर्वापरमिदंजागर्तिपरिपालयन्॥कश्चविज्ञायतेपूर्वंकोवरोदंडसंज्ञितः॥७॥किमर्थंचभवेद्दंडःकावास्यगतिरुच्यते
भीष्मउवाच॥शृणुकौरव्ययोदंडोव्यवहार्योयथाचसः॥८॥यस्मिन्हिसर्वमायत्तंसदंडइहकेवलः॥धर्म्मस्याख्यामहाराजव्यवहारइतीष्यते॥९

[illegible]२४:२

ग्र

अस्यात्रेदी रुंदंडो वै पार्थिवेषु परस्परं ॥ भयादंडस्य नान्योन्यं मनयं वयुधिष्ठिर ॥३४॥ दंडेन रक्ष्यमाणा हि राजन्नहरहः प्रजाः ॥ राजानं वर्द्ध
यंतीह तेषु दंडः परायणं ॥३५॥ व्यवस्थापयति क्षिप्रमिमं लोकं नरेश्वर ॥ सत्ये व्यवस्थितो धर्मो ब्राह्मणेष्ववतिष्ठति ॥३६॥ धर्मयुक्ता द्विजाश्रु
ष्ठा वेदयुक्ता भवंति च ॥ बभूव यज्ञो वेदेभ्यो यज्ञः प्रीणाति देवताः ॥३७॥ प्रीताश्च देवता नित्यमिंद्रं परिवदंत्यपि ॥ अन्नं ददाति शक्रश्चाप्यनुगृ
ह्णन्निमाः प्रजाः ॥३८॥ प्राणाश्च सर्वभूतानां नित्यमन्ने प्रतिष्ठिताः ॥ तस्मात्प्रजाः प्रतिष्ठंते दंडो जागर्ति तासु च ॥३९॥ एवं प्रयोजनश्चैव दंडः क्षत्रि
यतां गतः ॥ रक्षन्प्रजाः स जागर्ति नित्यं सुविहितोऽक्षरः ॥४०॥ ईश्वरः पुरुषः प्राणः सत्त्वं वित्तं प्रजापतिः ॥ भूतात्मा जीव इत्येवं नामभिः प्रोच्यते
ऽष्टभिः ॥४१॥ अदद्दंडमेवास्मै धर्ममैश्वर्यमेव च ॥ बलेन यश्च संयुक्तो ज्ञेयः पंचविधात्मकः ॥४२॥ कुलं बहुधनामात्याः प्रज्ञा प्रोक्ता बलानि
तु ॥ आहार्यमष्टकैर्द्रव्यैर्बलमन्यद्युधिष्ठिर ॥४३॥ हस्तिनोऽश्वा रथाः पत्तिर्नावो विष्टिस्तथैव च ॥ देशिकाश्चाविकाश्चैव तदष्टांगं बलं स्मृतं
४४॥ अथवांगस्य युक्तस्य रथिनो हस्तियायिनः ॥ अश्वारोहाः पदातिश्च मंत्रिणो रसदाश्च ये ॥४५॥ भिक्षुकाः प्राड्विवाकाश्च मौहूर्ता दैवचिं

तेजः ओजः
सहः ३
२११

धर्म । व्यवहार । धर्म । ईश्वर । जीव भूते ... पंचप्रकारात्मको
राजा ३

२११

नौकाः २ वैद्याः १

सत्यगो नित्यगोग्रजः ॥२१॥ असंग उदक्षः नयो मनुजेष्टः शिवंकरः ॥ नामान्येतानि दंडस्य कीर्तितानि युधिष्ठिर ॥२२॥ दंडो हि भगवान्विष्णु
र्दंडो नारायणः प्रभुः ॥ शश्वद्रूपमहद्बिभ्रन्महापुरुष ईयते ॥२३॥ तथोक्ता ब्रह्मकन्येति लक्ष्मीर्वृत्तिः सरस्वती ॥ दंडनीतिप्रधानोयं दंडो हि ब
हुविग्रहः ॥२४॥ अर्थानर्थौ सुखं दुःखं धर्माधर्मौ बलाबले ॥ दौर्भाग्यं भागधेयं च पुण्यापुण्ये गुणागुणौ ॥२५॥ कामाकामावृतुर्मासः
शर्वरी दिवसः क्षणः ॥ अप्रमादः प्रमादश्च हर्षक्रोधौ शमो दमः ॥२६॥ दैवं पुरुषकारश्च मोक्षामोक्षौ भयाभये ॥ हिंसाहिंसे तपो यज्ञः संय
मनियमावपि ॥२७॥ अंतश्चादिश्च मध्यं च कृत्यानां च प्रपंचनं ॥ मदः प्रमादो दर्पश्च देयादेये नयानयौ ॥२८॥ अशक्तिः शक्तिरित्येव मानस्तं
भौ व्ययाव्ययौ ॥ विनयश्च विसर्गश्च कालाकालौ च भारत ॥२९॥ अनृतं ज्ञानिता सत्यं श्रद्धाश्रद्धे तथैव च ॥ क्लीबता व्यवसायश्च लाभालाभौ
जयाजयौ ॥३०॥ तीक्ष्णता मृदुता मृत्युरागमानागमौ तथा ॥ विरोधश्चाविरोधश्च कार्याकार्ये बलाबले ॥३१॥ असूया चानसूया च धर्माध
र्मौ तथैव च ॥ अपत्रपानपत्रपे ह्रीश्च संपद्विपत्पदं ॥३२॥ तेजः कर्माणि पांडित्यं वाक्शक्तिस्तत्त्वबुद्धिता ॥ एवं दंडस्य कौरव्य लोकेऽस्मिन्बहुरूपता ॥३३॥

सु १

सभर्तव नृप५८॥ततोन्योव्यवहारोयंभर्तृप्रत्ययलक्षणः॥तस्मादिदंद्वयोवाथव्यवहारनिदर्शनं॥५९॥मातापिताचभ्राताचभार्याचैव
पुरोहितः॥नादंड्योविद्यतेराजायःस्वधर्मेनतिष्ठति॥६०॥इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मे॥१२१॥भीष्मउवाच॥अत्राप्युदाहरं
तीममितिहासंपुरातनं॥अंगेषुराजामतिमान्वसुहोमइतिश्रुतः॥१॥राजाधर्म्मविजयीसहपत्न्यामहातपाः॥मुंजपृष्ठंजगामाथपितृ
देवर्षिपूजितं॥२॥तत्रशृंगेहिमवतोमेरौकनकपर्वते॥यत्रमुंजावटेरामोजटाहरणमादिशत्॥३॥तदाप्रभृतिराजात्वृषिभिःसंशि
तव्रतैः॥मुंजपृष्ठइतिप्रोक्तःसदेशोरुद्रसेवितः॥४॥सतत्रबहुभिर्युक्तमांधातास्वनियमैर्गुणैः॥ब्राह्मणानामनुमतोदेवर्षिसदृशो
भवत्॥५॥सकदाचिददीनात्मासखाशक्रस्यमानितः॥अभ्यगच्छन्महीपालोमांधाताशत्रुकर्शनः॥६॥सोपसृत्यमांधातावसुहोमंन
राधिपं॥दृष्ट्वाप्रकृष्टंतपसाविनयेनाभ्यतिष्ठत॥७॥वसुहोमोपिराजानंगामर्घ्यंन्यवेदयत्॥सप्तांगस्यतुराज्यस्यपप्रच्छकुशलाव्यये॥
८॥सद्भिराचरितंपूर्वंयथावदनुयायिनं॥अपृच्छद्वसुहोमस्तंराजन्किंकरवाणिते॥९॥सोब्रवीत्परमप्रीतोमांधाताराजसत्तमः॥वसुहो

२१२

२१२

कृत्वा यात्र प्रयुक्तः यो ... हितः २

आदि ... दंडः ४ स्य १

नकाः॥ कार्ये तिकां कारा सिक्ताः सर्वैव कर्मणा पृथक्॥४६॥ सप्तप्रकृति निर्वाद्यांगं शरीरमिस्त्वा विदुः॥ राज्यं दंडमेवांगं दंडप्रभृवमेव च॥४७॥ ई
श्वरेण प्रयत्नेन कर्मणास्त प्रवर्त्तिंतः॥ दंडोदत्त स्समानात्मा दंडो हि दंसनात्तनो॥४८॥ राज्ञो दत्तस्ततनो नान्योपयाधर्नप्रदर्शितः॥ ब्रह्मणा
लोकरक्षार्थं स्वधर्मस्थापनाय च॥४९॥ भर्तृप्रत्ययउत्पन्नो व्यवहारस्तथापरः॥ तस्माद्यासंहितो दृष्टा भर्तृप्रत्ययलक्षणः॥५०॥ व्यव
हारस्तु वेदात्मा वेदप्रत्यय उच्यते॥ मौलश्च नरशार्दूल शास्त्रोक्तश्च तथापरः॥५१॥ उक्तोयस्त्वापि दंडोसौ भर्तृप्रत्ययलक्षणः॥ ज्ञेयाः सन्न
म नरेन्द्रस्यो दंडप्रत्ययलक्षणः॥५२॥ दंडः प्रत्यय दृष्टोपि व्यवहारात्मकः स्मृतः॥ व्यवहारः स्मृतोयश्च स वेदविषयात्मकः॥५३॥ यश्च वेदप्रस्त
तात्मा स धर्माय प्रदर्शिनः॥ धर्मप्रत्ययउद्दिष्टोयथाधर्मकृतात्मभिः॥५४॥ व्यवहारप्रजागोप्ता ब्रह्मदिष्टो युधिष्ठिर॥ त्रीन्धारयति लोकान्
वै सत्यात्मा भूतिवर्द्धनः॥५५॥ यश्च दंडः स दृष्टो वो व्यवहारः सनातनः॥ व्यवहारश्च दृष्टोन्यः स वेद इति निश्चितः॥५६॥ यश्च वेदः स वै धर्मोय
स्वधर्मः स प्रत्ययः॥ ब्रह्मा पितामहः पूर्वं बभूवाथ प्रजापतिः॥५७॥ लोकानां स हि सर्वेषां ससुरासुररक्षसां॥ समनुष्योरगवतां कर्त्ता चैव

अवीत् २२॥ अचत्वमनुकंपां वै कर्तुमर्हसि केशव॥ संकरो न भवेदत्र यथा वै विधीयतां॥२३॥ ततः स भगवान्ध्यात्वा त्वं सम्यग्वरायुधः
श्रात्मानमात्मना दंडं ससृजे देवसत्तमः॥२४॥ तस्मात्तस्य नियोगस्य चकारैकैकमीश्वरं॥ देवानामीश्वरं चक्रे देवं दशशतेक्षणं॥ यमं वै
वस्वतं चापि पितृणामकरोत्प्रभुः॥ धनानां राक्षसानां च कुबेरं चेश्वरं प्रभो॥२६॥ पर्वतानां सानुमंतं सरितां चामहोदधिं॥ इन्द्रं राज्ये सु
राणां च विदधे सुमहाप्रभुः॥२७॥ मृत्युं प्राणेश्वरमथो तेजसां च हुताशनं॥ रुद्राणां भूतेरीशानं गोप्तारं विद्धि धोपमं॥२८॥ महात्मानं महा
देवं विशालाक्षं सनातनं॥ वशिष्ठमीशं विप्राणां तेजसां जातवेदसं॥२९॥ तेजसां भास्करं चक्रे नक्षत्राणां निशाकरं॥ वनानां मधुवनं च
क्रे भूतानां प्रमथाधिपं॥३०॥ कुमारमदितिपुत्राणां स्कंदं राजानमादिशत्॥ कालं सर्वकलनकरं संहर्तृविजयात्मकं॥३१॥ मृत्योश्चतुर्लो
कस्य दुःखस्य च सुखस्य च॥ सर्वदेवमनुष्याणां राजा वैवस्वतो यमः॥३२॥ सर्वेषामेव रुद्राणां शूलपाणिरिति श्रुतिः॥ जमनं ब्रह्मणः पुत्रम
नुजातं दमं ददौ॥३३॥ प्रजानामधिपं श्रेष्ठं सर्वधर्मभृतामपि॥ महादेवस्ततस्त्विन्द्र नयज्ञो यथाविधि॥३४॥ दंडं धर्मस्य गोप्तारं वि

२१२

तं १ २३१ जातै १

छुतवत्तः ५ न४

द्विरणां ३
भिद्यते:

मेमहाप्राज्ञमासीनंकुरुनंदन॥१०॥मांधातोवाच॥बृहस्पतेर्मतंराजन्नधीतंसकलंत्वया॥तथैवौशनसंशास्त्रंविज्ञातंतेनरोत्तम॥११
॥दंडंज्ञातुमिच्छामिदंडउत्पद्यतेकथं॥किंवास्यपूर्वंजागर्तिकिंवापरममुच्यते॥१२॥कथंक्षत्रियसंस्थश्चदंडःसंप्रत्यवस्थितः॥ब्रूहिमेतु
महाप्राज्ञदद्याम्याचार्यवेतनं॥१३॥वसुहोमउवाच॥शृणुराजन्यथादंडःसंभूतोलोकसंग्रहः॥प्रजाविनयरक्षार्थंधर्मस्यात्मासनातन
नः॥१४॥ब्रह्मापितामहस्तुभगवान्सर्वलोकपितामहः॥ऋत्विजमात्मनस्तुल्यंददर्शेतिहिनःश्रुतं॥१५॥सगर्भंशिरसादेवोबहुवर्षाण्यधारय
त्॥पूर्णेवर्षसहस्रेतुगर्भःक्षुवतोपतत्॥१६॥सक्षुपोनामसंभूतःप्रजापतिररिंदम॥ऋत्विगासीन्महाराजयज्ञेतस्यमहात्मनः॥१७॥तस्मि
न्प्रवृत्तेसत्रेतुब्रह्मणःपार्थिवर्षभ॥हृष्टरूपप्रधानत्वाद्दंडःसोंतर्हितोभवत्॥१८॥तस्मिन्नंतर्हितेचापिप्रजानांसंकरोभवत्॥नैवकार्यंनवा
कार्यंभोज्याभोज्यंनविद्यते॥१९॥पुराणपायेकुतःसिद्धिर्हिंसंतीनांपरस्परं॥गम्यागम्यंतदानासीत्स्वंपरंचैववैसमं॥२०॥परस्परंविलुंपंति
सारमेयायथामिषं॥अबलान्बलिनोघ्नंतिनिर्मर्यादमवर्तत॥२१॥ततोपितामहोविष्णुंभगवंतंसनातनं॥संपूज्यवरदंदेवंमहादेवमथा

न२१ नो१ द१

सीकृत्य न्यायेन साहित्यमाह यदेति शोभनं उक्तं स्वधर्मके भूमौ धर्मपूर्वकेऽर्थं निर्वपे। अहं गंभीधानो के विधिना अतो भार्यां गत्वा सुतं लप्स्य। मित्तो वं नृपस्य स्वसा

धर्मार्थकामा पोपिकाजं अनु वे ना प्रभवाः। जाया सुगम्या कर्म नितरां सुसंतो बसं दंतु युगपत्रदुलंभं। यो भित्तं स्थान नृपो धर्मः पुत्र नृपो अर्थ

धीर्यगकामभवतोपः ८

२१

क्षेभ्यस्त्वतथैव च ॥ ऋषिभ्यो भगवान्सोमस्सोमाद्देवाः सनातनाः ॥४७॥ देवेभ्यो ब्राह्मणा लोके जाता नीत्युपधारय ॥ ब्राह्मणेभ्यश्च राजानो लो-
कान्रक्षन्ति धर्मतः ॥४८॥ स्थावरं जंगमं चैव क्षत्रियेभ्यः सनातनं ॥ प्रजा लोकस्य रक्षार्थं सवजागर्ति नाम च ॥४९॥ सहं संदीपनो दंडः पितामह-
स्य प्रभुः ॥ जागर्ति कारणं पूर्वं मध्ये चान्ते च भारत ॥ बृहस्पतेस्सर्वलोकस्य महादेवः प्रजापतिः ॥५०॥ देवदेवः शिवः धाता जाग्रत्ति सततं प्रभुः
कपर्दी शंकरो रुद्रः शिवः स्थाणुरुमापतिः ॥५१॥ इत्येष दंडो विख्यात आदौ मध्ये तथावरः ॥५२॥ भूमिपालो यथान्यायं वर्तेतैवं च धर्मवि-
त् ॥ भीष्म उवाच ॥ इतीदं वसुहोमस्य शृणुयाद्यो मतं नरः ॥५३॥ श्रुत्वा च सम्यग्वर्त्तेत स सर्वकामानवाप्नुयात् ॥ इति ते सर्वमाख्यातं यो दंडो
मनुजर्षभ ॥५४॥ नियन्ता सर्वलोकस्य धर्माक्रान्तस्य भारत ॥ इति श्रीमहाभारते शान्तौ राजधर्मे दंडोत्पत्तिः ॥१२१॥ युधिष्ठिर उवाच ॥ ना-
त धर्मार्थकामानां श्रोतुमिच्छामि निश्चयं ॥ लोकयात्रा हि कार्त्स्न्येन त्रिषु चैतेषु प्रतिष्ठिता ॥१॥ धर्मार्थकामाः किंमूलाः सर्वेषां प्रभवश्च कः ॥
अन्योन्यं चानुषज्जन्ते साहित्यं च पृथक् पृथक् ॥२॥ ये यादृग्सुमनसो लोके धर्मार्थनिश्चये ॥ कालप्रभावसंस्थासु सज्जन्ते च त्रयस्तदा ॥३॥

२१४

धर्मकामाः प्रश्नाः १

व त्वं

सूचीकटाहन्यायेन साहित्यमाह १

किंमूलत्वं क्रियतात्पर्यः २

उत्पत्तिस्थानं २



२१४

दुष्टनिग्रह एव दण्ड...

स्मवेसत्सुतं ददौ॥ विष्णुरंगिरसे प्रादादंगिरा मुनिसत्तमः॥३५॥ प्रादादिंद्रमरीचिभ्यां मरीचिर्भृगवे ददौ॥ भृगुर्ददावृषिभ्यस्तु दंडं धर्मसमा
हितं॥३६॥ ऋषयो लोकपालाभ्यां लोकपालाः यमाय च॥ यमस्तु मनवे प्रादादादित्यतनयेषु च॥३७॥ पुत्रेभ्यः श्राद्धदेवस्तु सूक्ष्मधर्मा
र्थकारणात्॥ विभज्य दंडः कर्त्तव्यो धर्मेणानुयदृच्छया॥३८॥ दुष्टानां निग्रहो दंडो हिरण्यं बाह्यतः क्रिया॥ व्यंगत्वं च शरीरस्य वधो नाल्प
स्यकारणात्॥३९॥ दधारपीवास्तांस्तांश्च देहत्यागोविवासनं॥ सूद्दैस्तर्यपुत्रस्तु मनुर्वै रक्षणार्थकं॥४०॥ आनुपूर्व्याच्च दंडोयं प्रजा जाग
र्त्तिपालयन्॥ दंडोजागर्त्तिभगवा दिंद्रादर्विर्द्धिभावसुः॥४१॥ अग्रेजागर्त्ति वरुणांवरुणाच्चप्रजापतिः॥ प्रजापतेस्ततो धर्मोजागर्त्ति वि
नयात्मकः॥४२॥ धर्माच्च ब्रह्मणः पुत्राव्यवसायः सनातनः॥ व्यवसायात्तेजसोजागर्त्तिपरिपालयन्॥४३॥ ओषधस्तेजसस्तस्मादोषधिभ्य
श्च पर्वताः॥ पर्वतेभ्यश्च जागर्त्ति रसोरसगुणस्तथा॥४४॥ जागर्त्ति निर्ऋतिर्देवी ज्योतींषि निर्ऋतेरपि॥ वेदाः प्रतिष्ठा ज्योतिर्भ्यस्ततो हयशि
राः प्रभुः॥४५॥ ब्रह्मापितामहस्तस्माज्जागर्त्तिप्रभुरव्ययः॥ पितामहान्महादेवोजागर्त्तिभगवान् शिवः॥४६॥ विश्वेदेवाः शिवाच्चापि वि

नादी ४
१

द्विजन्तेलोकाःसर्व्वाद्देशमगतादिव॥१६॥ तंप्रजानानुवर्त्तन्तेब्राह्मणानवसाधवः॥ ततःसंशयमाप्नोतितथावध्यमेतिवा॥१७॥ अपध्वस्तस्त्वव
मतोदुःखंजीवितमृच्छति॥ जीवेद्वायदपध्वस्तःतच्छुद्धंमरणंभवेत्॥१८॥ अत्रैतदाहुराचार्याःपापस्यपरिगर्हणं॥ सेवितव्यात्रयीविद्यास
त्कारोब्राह्मणेषुच॥१९॥ महतांनाममभवेद्धर्म्मोविवर्द्धेत्तमसाकुले॥ ब्राह्मणांश्चापिसेवेतक्षमायुक्तान्मनस्विनः॥२०॥ नमृदुर्दृढशीलःस्यात्तत्त
तंसुखमास्थितः॥ धर्मान्वितान्संप्रविशेद्बहिःक्लत्वेरुदुःखतान्॥२१॥ प्रसादयेन्मधुरयावाचाप्यथकर्मणा॥ नवास्मीतिवदेन्नित्यंपरेषांकीर्तयन्
गुणान्॥२२॥ अपापोह्येवमाचारःक्षिप्रंबहुमतोभवेत्॥ पापान्यपिहिकृच्छ्राणिसतच्छेद्यानिमूलिमि॥२३॥ गुरवोहिपरंधर्म्मंयंब्रूयुस्तंतथाकु
रु॥ गुरूणांहिप्रसादाद्धिश्रेयःपरमवाप्स्यसि॥२४॥ गुरवोदेशिकाधर्मंधर्मस्वभनिलन्तणाः॥ तत्त्वेवनलयाप्राप्नोनिःपापत्वंभविष्यसि॥२५
इतिमहाभारतेशान्तौराजधर्म्मेकामंदाग्निसंवादः॥१२२॥ युधिष्ठिरउवाच॥ इमेजनानरश्रेष्ठप्रशंसन्तिसदाभुवि॥ धर्म्मस्यशीलमेवादौत
तोमेसंशयोमहान्॥१॥ यदीछसितत्वमस्माभिर्ज्ञातुंधर्म्मभृतांवर॥ श्रोतुमिच्छामितत्सर्वंयथैतदुपलभ्यते॥२॥ कथंनुप्राप्यतेशीलंश्रोतुमिच्

वा४
मसा४

२१९

कानराक्षितिपोद्ध:२

२१५

स्य भागार्थत्व ... त्रिवर्गस्य ... फलं कामस्य मूलं ... 
प्रयो तत्रां संकल्प इति नृपादि विषयाः संकल्पो नृपा ... ार्थः।३।इति सर्वे ते संकल्पमूलाः।मो ... सर्वस्मादु ...

धर्म्ममूलः सदैवार्थः कामोर्थफलमुच्यते।।संकल्पमूलास्ते सर्वे संकल्पो विषयात्मकः।।४।।विषयाश्चैव कार्त्स्न्येन सर्व आहारसिद्धये।।मूलमेतत्त्रि
वर्गस्य निवृत्तिर्मोक्ष उच्यते।।५।।धर्म्माच्छरीरसंगुप्तिर्धर्म्मार्थं चार्थ उच्यते।।कामो वै निफलस्त्वात्र सर्वे ते च रजस्वलाः।।६।।सान्निरुध्यांश्चरेदेतान्नव
तान्मनसा त्यजेत्।।विमुक्तस्तपसा सर्वान्धर्म्मादीन्कामनैष्ठिकान्।।७।।श्रेयो बुद्धिस्त्रिवर्गस्य यद्यं प्राप्नुयान्नरः।।कुर्यात्तं यदि लोकेन तदवज्ञा
तो निहतस्य या।।८।।अथ धान फलो धर्म्मो मलोर्थस्य च संग्रहः।।सप्रमोदफलः कामो भ्रय स्वगुणा विवर्जितः।।९।।अत्राप्युदाहरन्तीममितिहा
सं पुरातनं।।कामंदकस्य संवादमांगिरिष्ठस्य चोभयोः।।१०।।कामंदमृषिमासीनमभिवाद्य नराधिपः।।आंगरिष्ठोथ पप्रच्छ कृतप्रश्नः समयं प्रियः।।
११।।यः पापं कुरुते राजा काममिह वलात्कृतः।।प्रत्यासन्नस्य तस्येह किं स्यात्पापप्रनाशनं।।१२।।अधर्मे धर्म इति च यो ज्ञानादाचरेन्नरः।।तं चापि प्र
थितं लोके कथं राजा निवर्त्तयेत्।।१३।।कामंदक उवाच।।यो धर्म्मार्थौ परित्यज्य काममेवानुवर्त्तते।।स धर्म्मार्थपरित्यागात्प्रज्ञानाशमिहर्छति।।१४
प्रज्ञानाशात्मको मोहस्तथा धर्म्मार्थनाशकः।।तस्मान्नास्तिकता चैव दुराचारश्च जायते।।१५।।दुराचारान्यदा राजा प्रदुष्टान्न नियच्छति।।तस्माद्

नटं
र्ग पंक्ति १
नमेयाद्

... अनु लोके जः ... धानः ... सन्ने यः सत्य प्रधानः मले ... स्याह।धर्मो दि ति।आ नो ... र्थं ... धर्मः।काम ... अर्थः
श्री तपंर कामंद इत्येतेहे ... ।२ त्यर्थः।६।धर्मत्व ... ।अर्थो निः काम कर्मार्थः।कामः दे ह धान ... मात्रार्थः इत्यवमे ते
परशत पृष्ठ ३

ऽयस्यां ज्ञेतुं न संशयः॥ न हि किंचिदसाध्यं वै लोके शीलवतो भवेत्॥१५॥ एकरात्रेण मांधाता त्र्यहेण जनमेजयः॥ सप्तरात्रेण नाभागः पृथिवीं प्र
तिपेदिरे॥१६॥ एते हि पार्थिवाः सर्वे शीलवंतो दयान्विताः॥ अतस्तेषां गुणक्रीतान् सर्वान् स्वयमागता॥१७॥ दुर्योधन उवाच॥ कथं तत्प्राप्य
ते शीलं श्रोतुमिच्छामि भारत॥ येन शीलेन संप्राप्तास्त्वयमेव वसुंधरा॥१८॥ धृतराष्ट्र उवाच॥ अत्राप्युदाहरंतीम मितिहासं पुरातनं॥
नारदेन पुरा प्रोक्तं शीलमाश्रित्य भारत॥१९॥ प्रह्लादेन हृतं राज्यं महेंद्रस्य महात्मनः॥ शीलमाश्रित्य दैत्येन त्रैलोक्यं च वशीकृतं॥२०॥ त
तो बृहस्पतिं शक्रः प्रांजलिः समुपस्थितः॥ तमुवाच महाप्राज्ञः श्रेयो वद निवेदितः॥२१॥ ततो बृहस्पतिस्तस्मै ज्ञानं नैःश्रेयसं परं॥ कथयामास
भगवान् देवेंद्राय कुरूद्वह॥२२॥ एतावच्छ्रेय इत्येवं बृहस्पतिरभाषत॥ इंद्रस्तु भूयः पप्रच्छ कोविशेषो भवेदिति॥२३॥ बृहस्पतिरुवाच॥ वि
शेषोस्ति महांस्तात भार्गवस्य महात्मनः॥ तत्र संशयं भद्रं ते भूयः पप्रच्छ शुद्धं हृदं॥२४॥ आत्मनस्तु ततः श्रेयो भार्गवात्सुमहातपाः॥ ज्ञानमाग
मयत्प्रीत्या पुरंदरः परमद्युतिः॥२५॥ तेनापि समनुज्ञातो भार्गवेस्ति महात्मना॥ श्रेयोस्तीति पुनर्भूयः शुक्रं प्राह शतक्रतुः॥२६॥ भार्गवस्त्वाह



नं२

मोपध्यो:॥४
सं४

२१६

मिभारत॥ किं लक्षणं वनं ब्रह्मन्‌ तं ब्रूहि मे वदतां वर॥३॥ भीष्म उवाच॥ पुरा दुर्योधनेनैव धृतराष्ट्राय मानद॥ आख्यातं तप्यमानेन श्रियं दृष्ट्वा
तथागतां॥४॥ इन्द्रप्रस्थे महाराज तच्छृष्वेभ्रात्रकस्य च॥ सभायां वायुदक्षं तत्सर्वं केश्वराणु भारत॥५॥ भूवन लोक सोमां दृष्ट्वा समृद्धिं चातुरस्तथा॥
दुर्योधनस्तदासीन सर्वपिश्चन्यवेश्यत॥६॥ श्रुत्वा हि धृतराष्ट्रस्तु दुर्योधनवचस्तदा॥ अब्रवीत्करोसक्तिं दुर्योधनमिदं वचः॥७॥ धृतराष्ट्र
उवाच॥ किमर्थं तप्यते पुत्र श्रोतुमिच्छामि तत्त्वतः॥ श्रुत्वा त्वामनुनेयामि यदि सम्यक्‌ भविष्यति॥८॥ त्वया च महदैश्वर्यं प्राप्तं परपुरंजय॥ किंक
राभ्रातरः सर्वे मित्रसंबंधिनः सदा॥९॥ आच्छादयसि प्रावारान्‌ अश्नासि पिशितौदनम्‌॥ आजानेया वहंत्यश्वाः केनासि हरितः कृशः॥१०॥ दुर्यो
धन उवाच॥ ईदृशानि सहस्राणि स्नातकानां महात्मनां॥ भुंजते रुक्मपात्रेषु युधिष्ठिरनिवेशने॥११॥ दृष्ट्वा च तां सभां दिव्यां दिव्यपुष्पफला
न्वितां॥ अश्वस्थो तित्तिरकल्माषस्वारिणी वैविविधानिव॥१२॥ दृष्ट्वा तां यां द्रुपयानां मस्तिं वैश्रवणं शुभं॥ अभियाता सुमहत्तामनुराग्वा लिनार
त॥१३॥ धृतराष्ट्र उवाच॥ यद्यास्तु निश्चियं नाम यादृशो सौ युधिष्ठिर॥ विशिष्टो वा न स्यात्तु शीलवान्‌ भव पुत्रक॥१४॥ शीलेन हि त्रयो लोकाः

त्वा प्र॰ मं॰ त्तै॰ नै॰ वञ्छेय उक्तास्य प्रह्लादो ब्रह्मवादिनं ॥ ३९ ॥ अभ्यर्चितस्तेन तदा दैत्येन्द्रो वाक्यमब्रवीत् ॥ यथावद्गुरवे तस्मै प्रीतोऽस्मि द्विजस
त्तम ४० ॥ वरं वरणीष्व भद्रं ते प्रदातास्मि न संशयः ॥ उक्तमित्येव दैत्येन्द्रमुवाच स वै द्विजः ॥ ४१ ॥ प्रह्लादस्त्वं प्रवीतोऽसि प्रीतो ग्रहणां वर इत्युग
ब्रह्मण उवाच ॥ यदि राजन्प्रसन्नस्त्वं मम चेच्छसि प्रियं ॥ ४२ ॥ भवतः शीलमिच्छामि प्राप्तुमेष वरो मम ॥ ततः प्रीतस्तु दैत्येन्द्रो भयमस्याभवन्म
हत् ॥ ४३ ॥ वरं प्रदिष्टे विप्रस्य नाल्पतेजसमित्युत ॥ एवमस्त्विति तथा ह्यप्रह्लादो विस्मितस्तदा ॥ ४४ ॥ उपाकृत्य तु विप्राय वरं दुःखान्वितोऽभव
त् ॥ दत्ते वरे गते विप्रे चिन्तासीन्महती तदा ॥ ४५ ॥ प्रह्लादस्य महाराज निश्चयं न च जग्मिवान् ॥ तस्य चिन्तयतस्तात च्छायाभूतं महाद्युतिः ॥ ४६ ॥ ते
जो विग्रहवन्तात शरीरमजहात्तदा ॥ तमपृच्छन्महाकायं प्रह्लादः को भवानिति ॥ ४७ ॥ प्रत्याह तं तु शीलोऽस्मि त्यक्तो गच्छाम्यहं त्वया ॥ तस्मिन्द्वि
जोत्तमे राजन्वत्स्याम्यहमनिन्दिते ॥ ४८ ॥ योऽसौ शिष्यत्वमागम्य त्वयि नित्यं समाहितः ॥ ४९ ॥ इत्युक्त्वान्तर्हितं तद्वै शक्रं चान्वाविशत्प्रभो ॥ तस्मिंस्तेज
सि याते तु तादृग्रूपस्ततोऽपरः ॥ ५० ॥ शरीरान्निःसृतस्तस्य को भवानिति चाब्रवीत् ॥ धर्मं प्रह्लाद मां विद्धि यत्रासौ द्विजसत्तम ॥ ५१ ॥ तत्र यास्या

उपदेशं ३        अध्यायः २

सर्वज्ञः प्रह्लादस्य महात्मनः॥ ज्ञानमस्ति विशेषेणोत्पन्नो हृष्टस्तु सोऽभवत्॥२९॥ ततो ब्राह्मणो भूत्वा प्रह्लादं पाकशासनः॥ गत्वा शेवाक्यमेधा
वीश्रेयद्रुष्टुमिवेदितुं॥२८॥ प्रह्लादस्त्वब्रवीद्विप्रं त्तरणो नास्ति द्विजर्षभ॥ त्रैलोक्यराज्यस्य तस्य ततो मेयदिशोमेन॥३०॥ ब्राह्मणस्त्वब्रवीद्रा
जन्धीतोसि त्वं त्तरणो भवेन्नर॥ ततोऽयादेष्टुमिच्छामि ममाचर्यमनुत्तमं॥३१॥ ततः प्रीतो भवद्राजा प्रह्लादो ब्रह्मवादिनः॥ नयेत्तु त्काशुभे काले ज्ञा
नतत्वं ददौ तदा॥३१॥ ब्राह्मणोपि यथान्यायं गुरुवृत्तिमनुत्तमं॥ चकार सर्वभावेन यदस्य मनसेप्सितं॥३२॥ एवमुक्तेन तेन तुष्टः प्राह कृपर्म
दम॥ त्रैलोक्यराज्यं धर्मज्ञ कारणं तद्ब्रवीहि मे॥३३॥ प्रह्लादोपि महाराज ब्राह्मणं वाक्यमब्रवीत्॥ प्रह्लाद उवाच॥ नासूयामि द्विजान्विप्ररा
ज्ञास्मीति कदाचन॥३४॥ काव्यानि वदतां तेषां संयच्छामि वदामि वा॥ ते विश्वस्ताः प्रभाषन्ते संयच्छंति च मां सदा॥२५॥ ते मां काव्यं पथायुक्तं शुश्रा
भेमनसूयकं॥ धर्मात्मानं जितस्वामो जितक्रोधं जितेन्द्रियं॥३६॥ ते मां सिंचंति शास्तारः क्षौद्रं मधुमक्षिका यथा॥ सोहं वाग्गग्रविद्यानां रसना
मवलोकये॥३७॥ स्वजात्यानां च निष्ठामि नक्षत्राणीव चन्द्रमाः॥ एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमं॥३८॥ यद्ब्राह्मणमुखे काव्यमेतच्छु

एवमिंद्र नरेश्वर। प्राप्यते च यथा शीलं तं चोपायं वदस्व मे॥ धृतराष्ट्र उवाच॥ सोपायं पूर्वमुद्दिष्टं प्रह्लादेन महात्मना॥ ६३॥ संक्षेपेण तु शीलस्य
शृणु प्राप्तिं नरेश्वर। अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा॥ ६४॥ अनुग्रहश्च दानं च शीलमेतत्प्रशस्यते। यदन्येषां हितं न स्यादात्मनः क
र्म पौरुषं॥ ६५॥ अपत्रपेत वा येन न तत्कुर्यात्कथंचन। तत्तु कर्म तथा कुर्याद्येन शीलं भवेद्धृदि॥ ६६॥ शीलं समासेनैतत्ते कथितं कुरुसत्तम
यद्यप्यशीला नृपते प्राप्नुवंति श्रियं क्वचित्॥ ६७॥ न भुंजते चिरं तात समूलाश्च न संति ते॥ धृतराष्ट्र उवाच॥ एतद्विदित्वा तत्त्वेन शीलं वा जय पुत्र
क॥ ६८॥ यदीच्छसि श्रियं तात सुविशिष्टां युधिष्ठिर॥ भीष्म उवाच॥ एतत्कथितवान्पुत्रं धृतराष्ट्रो नराधिपः॥ ६९॥ एतत्कुरुष्व कौंतेय तत
स्त्वाप्स्यसि तत्फलं॥ इति श्रीमहाभारते शांतौ राजधर्मे शीलवर्णनं नाम॥ १२३॥ युधिष्ठिर उवाच॥ शीलं प्रधानं पुरुषे कथितं ते पितामह॥ क
थं त्वाशा समुत्पन्ना यथा च तद्वदस्व मे॥ १॥ संशयो मे महानेव समुत्पन्नः पितामह। छेत्ता तु नं च नान्योस्ति त्वत्तः परपुरंजय॥ २॥ पितामहाशा
महती ममासीद्धि सुयोधने। प्रासे युद्धे तु यद्युक्तं तत्कर्ता यमितिप्रभो॥ ३॥ सर्वस्याशा सुमहती पुरुषस्योपजायते। तस्यां विहन्यमानायां दुः

२४

२१८

218

3 ✗ पञ्चश्चाहवलं विद्धि यतो वृत्तमहं ततः॥५४॥ इत्युक्त्वा प्रययौ तत्र यतो वृत्तं नराधिप। ततः प्रभामयी देवी शरीरात्तस्य निर्ययौ॥

१५२

मिदैत्येन्द्र यतः शीलं ततो ह्यहं॥५०॥ ततो परो महाराज प्रज्वलन्निव तेजसा॥ शरीरान्निःसृतस्तस्य प्रह्लादस्य महात्मनः॥५१॥ को भवानिति पृष्टश्च
तमाह स महाद्युतिः॥ सत्यं विद्धि सुरेन्द्रं तु प्रयास्ये धर्म्ममन्वहं॥५२॥ तस्मिन्ननुगतं धर्म्मे महात्मैव पुरुषोऽपरः॥ निश्चक्राम ततस्तस्मात्पृष्टश्चा
ह महाद्युतिः॥५३॥ वृत्तं प्रह्लाद मां विद्धि यतः सत्यं ततो ह्यहं॥ तस्मिन्गते महाशब्दः शरीरात्तस्य निर्ययौ॥५४॥ तामपृच्छत्स दैत्येन्द्रः साश्री
तित्येनमब्रवीत्॥ निषेन्नोऽस्मि स्वयं वीर त्वयि सत्यपराक्रम॥५५॥ त्वया त्यक्ता गमिष्यामि बलं ह्यनुगता ह्यहं॥ ततो भयं प्रादुरासीत्प्रह्लादस्य
तदा महात्मनः॥५६॥ अपृच्छत्त ततो भूयः क्व यासि कमलालये॥ त्वं हि सत्यव्रता देवी लोकस्य परमेश्वरी॥५७॥ कश्चासौ ब्राह्मणश्रेष्ठस्तत्त्वमिच्छा
मि वेदितुं॥ श्रीरुवाच॥ स शक्रो ब्रह्मचारी यस्त्वया चैवोपशिक्षितः॥५८॥ त्रैलोक्ये ते यदैश्वर्यं तत्तेनापहृतं प्रभो॥ शीलेन हि त्रयो लोकास्त्वया
धर्मज्ञ निर्जिताः॥५९॥ तद्विज्ञाय सुरेन्द्रेण तव शीलं हृतं प्रभो॥ धर्मः सत्यं तथा वृत्तं बलं चैव तथा ह्यहं॥६०॥ शीलमूला महाप्राज्ञ सदा नास्त्यत्र
[illegible]॥ भीष्म उवाच॥ एवमुक्त्वा गता श्रीस्तु ते च सर्वे युधिष्ठिर॥६१॥ दुर्योधनस्तु पितरं भूय एवाब्रवीदिदं॥ शीलस्य तत्त्वमिच्छामि वेत्तुं कौ

भिःकर्षितो॥प्रमाराद्बुसरश्रेष्ठंकार्मुकंसंगृह्यआस्थितः॥१७॥ततोगव्यूतिमात्रेणमृगयूथपयूथपः॥तस्यवाणभयंप्राप्तोतर्हिवा
न्प्रहसन्निव॥१८॥तस्मिन्निपतितेनवाणेभूमौज्वलिततेजसि॥प्रविवेशमहारण्यंमृगोराजन्पयाद्द्रुतः॥१९॥इतिश्रीमहाभारतेशांतौ
राजधर्मेऋषभसुमित्रोनाम॥१२५॥भीष्मउवाच॥प्रविश्यसमहारण्यंतापसानामथाश्रमं॥आससादततोराजाश्रांतश्चोपाविशत्त
दा॥१॥तंकार्मुकधरंदृष्ट्वाश्रमार्त्तंक्षुधितंतदा॥समेत्यऋषयस्तस्मिन्पूजांचक्रुर्यथाविधि॥२॥सपूजामृषिभिर्दत्तांसंप्रगृह्यनराधिपः
अपृच्छत्तापसान्सर्वांस्तपसावृद्धिसंनतमान्॥३॥तेतस्यराज्ञोर्थंपूनेतंसंप्रगृह्यतपोधनाः॥ऋषयोराजशार्दूलंतमपृच्छन्प्रयोजनं॥४
केनभद्रंसुखार्थेनसंप्राप्तोसितपोवनं॥पदातिर्वद्धनिस्त्रिंशोधन्वीवाणीनरेश्वर॥५॥एतदिच्छामहेश्रोतुंकुतःप्राप्तोसिमानद॥कस्मि
न्कुलेनुजातस्त्वंकिंवेच्छसिब्रूहिनः॥६॥ततःसराजासर्वेभ्योद्विजेभ्यःपुरुषर्षभः॥आचष्टेतद्यथान्यायंपरिचर्यांचभारत॥७॥हैहया
नांकुलेजातःसुमित्रोमित्रनंदनः॥चरामिमृगयूथानिनिघ्नन्वाणैःसहस्रशः॥८॥बलेनमहतागुप्तःसामात्यःसावरोधनः॥मृगस्तु

स्वो मृत्युर्न संशयः ॥४॥ सो हताशो दुर्बुद्धिस्तु नस्तेन दुरात्मना ॥ धार्तराष्ट्रेण राजेन्द्र पश्य मंदात्मतां मम ॥५॥ आशां महत्तरां मन्ये पर्वतादपि स
द्रुमात् ॥ आकाशादपि वा राजन्नप्रमेयैव वा पुनः ॥६॥ एषा चैव कुरुश्रेष्ठ दुर्विविंत्या सुदुर्लभा ॥ दुर्लभत्वाच्च पश्यामि किमन्यद्दुर्लभं ततः ॥७॥
भीष्म उवाच ॥ अत्रैतद्वर्णयिष्यामि युधिष्ठिर निबोध तत् ॥ इतिहासं तु सुमित्रस्य निर्वृत्तमृषभस्य च ॥८॥ सुमित्रो नाम राजर्षिर्हैहयो मृगयां
न:४ गो ॥ स ससार मृगं विद्ध्वा बाणेन नतपर्वणा ॥९॥ स मृगो बाणमादाय प्रययावमितविक्रमः ॥ स च राजा बलात्तूर्णं ससार मृगयूथपं ॥१०॥ ततो
निम्नं स्थलं चैव स मृगो द्रुतवदाशुगः ॥ मुहूर्तमिव राजेन्द्र समेन पथ्यगमत्तदा ॥११॥ ततः स राजा ससरः प्राणैरेव बलेन च ॥ ससार बाणं दिस्त
ज्य सखड्गो हंसवत्तदा ॥१२॥ ततो नदांस्तडागांश्चैव नद्वलानि वनानि च ॥ अतिक्रम्याभ्यतिक्रम्य ससारैको वनेचरः ॥१३॥ स तु कामान्मृगो
राजन्नासाद्यासाद्य तं मृगं ॥ पुनरभ्येति व राजा वनेन महतान्वितम् ॥१४॥ स तस्य बाणैर्बहुभिः समभ्यस्तो वनेचरः ॥ प्रक्रीडन्निव राजेन्द्र मपर
भ्येति जवनोऽन्तिकं ॥१५॥ पुनश्च जवमास्थाय मृगयूथपयूथपः ॥ अभ्येत्याभ्येत्य राजेंद्र पुनरभ्येति चान्तिकं ॥१६॥ तस्य भयाद्दूरंतोन्नाशरात्रस्वा

पुरा हं रा जश्रा दृल्तीर्थान्यनुचरन्नभो॥ समासादितवान्दिव्यं नरनारायणाश्रमं॥४॥ यत्रासौ बदरी रम्या ह्रदो वैहायसस्तथा॥ यत्र चाश्रु
शिरा राजन्व्यासोध्यापितः शिष्यान॥३॥ तस्मिन्सरसि स्नात्वा हं विधिवत्तर्पयं पुरा॥ पितृन्देवतांश्चैव ततो आश्रममियां तदा॥४॥ रेमाते यत्र
तो नित्यं नरनारायणावृषी॥ अदूरादाश्रमं चापि वासार्थमगमं तदा॥५॥ ततश्चीराजिनधरं कृशमुच्चयतां वरं॥ अद्राक्षमृषिमायान्तं तनु
नामतपोधनं॥६॥ अन्यैर्नरैर्महाबाहो नयानयगुणान्वितं॥ कृशत्वेनापि राजर्षे न दृष्टा तादृशः क्वचित्॥७॥ शरीरमपि राजेन्द्र तस्य कानि
ष्ठिकासमं॥ ग्रीवा बाहू तथा पादौ केशाश्चाद्भुतदर्शनाः॥८॥ शिरः कायानुरूपं च कर्णौ नेत्रे तथैव च॥ पादेनस्याभवाद्याथ स्थितः प्रांज
लिरग्रतः॥९॥ निवेद्य नामगोत्रं च पितरं च नरर्षभ॥ प्रदिष्टे चासने तेन शनैरहमुपाविशं॥१०॥ ततः स कथयामास कथा धर्मार्थसंहिताः।
ऋषिमध्ये महाराज तनुर्धर्मभृतां वरः॥११॥ तस्मिंस्तु कथयत्येवं राजा राजीवलोचनः॥ उपायाज्जवनैरश्वैः सबलः सावरोधनः॥१२॥ स्म
रन्पुत्रमरण्ये वै नष्टं परमदुर्मनाः॥ भूरिद्युम्नपिता श्रीमान्वीरद्युम्नो महायशाः॥१३॥ इह द्रक्ष्यामि तं पुत्रं द्रक्ष्यामीहेति पार्थिव॥ एवमाशाहतो

विद्रो वा येन सर्वांस्मै विशन्याश्रमं ॥९॥ तं विशंतमनुप्राप्तो वनमेन यदृच्छया ॥ भवन्तकाशं नस्पृष्टीर्हनाशङ्कमन्यदर्शितः ॥१०॥ किंतु दुःख
मतोन्यदैयदस्यं श्रमकार्षीतः ॥ भवता माश्रमे यो स्य हताशो भ्यद्दलन्तरगः ॥११॥ न गतिर्लब्धा रगं त्यागो न मरणस्य न पोधनाः ॥ दुःखं करोति न
स्तीव्रं यथाशा विहता मम ॥१२॥ हिमवान्वा महाशैलः समुद्रो वा महोदधिः ॥ महत्त्वाद्वष्प्राप्यंते नाः सर्वे मनसा वा तपोधनाः ॥१३॥ आशा पि
भ्रयसी नेष्टा यस्या नांतमहं गतः ॥ भवतो विदितं सर्वं सर्वज्ञा हि तपोधनाः ॥१४॥ भवेन्तः सुमहाभागास्तस्मात्पृच्छामि संशयं ॥ आशावान्पुरुषो
यः स्यादंतरिक्षमथापि वा ॥१५॥ किंतु आपूरतरं लोके महत्त्वान्नाति भाति वा ॥ एतदिच्छामि तत्वेन श्रोतुं किमिह दुर्लभं ॥१६॥ यदि गुह्यं न वो नि
त्यं तदा प्रब्रूत मा चिरं ॥ न गुह्यं श्रोतुमिच्छामि युष्मभ्यो द्विजसत्तमाः ॥१७॥ भवत्तपो विघातो वा यदि स्याद्विरमेनतः ॥ यदि वास्ति कथा योगो योयं प्र
श्नो मयेरितः ॥१८॥ एतत्कारणसामर्थ्यं श्रोतुमिच्छामि तत्वतः ॥ भवंतोपि तपो नित्या कुर्युरेतत्समाहिताः ॥१९॥ इति श्रीमहाभारते शांतिपर्वणि रा
जधर्मे ऋषभगीतासु ॥१२५॥ भीष्म उवाच ॥ ततस्तेषां समस्तानामृषीणामृषिसत्तमः ॥ ऋषभो नाम विप्रर्षिर्विस्मयादिदमब्रवीत् ॥१॥

राजोवाच ॥ वीरद्युम्न इति ख्यातो राजाहं दिक्षु विश्रुतः ॥ भूरिद्युम्नं सुतं नष्टमन्वेष्टुं वनमागतः ॥ १ ॥ एकः पुत्रः स दिष्टांगः बालः स्ववर्मेन नष्ट
नेदृश्यते वने वास्मिंस्तमन्वेष्टुं चराम्यहं ॥ २ ॥ ऋषभ उवाच ॥ इत्येवमुक्ते वचने राज्ञा मुनिरथोऽसुरवः ॥ तूष्णीमेवाभवत्तत्र न च प्रत्युक्त
वान्नृपं ॥ ३ ॥ यदि तेन पुरा विप्रो राज्ञा नात्यर्थमानितः ॥ आशाहेतुं तथा राजेंद्र तपो दीर्घं समास्थितः ॥ ४ ॥ ज्ञातेयह पदं राज्ञो न कदिष्य क
थंचन ॥ अन्येषां चैव वर्णानामिष्टत्वाधिपतेस्तथा ॥ ५ ॥ आशा हेतुरसंवालं उत्पादयति नित्यशः ॥ नामसंख्य परेष्यामिहमिह तापवास्थि
तः ॥ ६ ॥ वीरद्युम्नस्ततं भूयः पप्रच्छ मुनिसत्तमं ॥ राजोवाच ॥ आशायाः किं कृशत्वं वा किं चेत्स्यु विदुर्लभं ॥ ७ ॥ ब्रवीतु भगवांस्तत्त्वं
हि धर्मार्थदर्शिवान् ॥ ततः संस्मृत्य तत्सर्वं स्मारयिष्यन्निवाब्रवीत् ॥ ८ ॥ राजानं भगवान्विप्रस्तनुः कृशतनुस्तदा ॥ ऋषिरुवाच ॥ कृ
शत्वेन समं राजन्नाशाया विद्यते न्यये ॥ ९ ॥ तस्या वै दुर्लभत्वाद्धि प्रार्थिता प्रार्थिता मया ॥ राजोवाच ॥ कृशाकृशे मया ब्रह्मन् गृहीते तव    २२१
वचनाद्भव ॥ १० ॥ दुर्लभत्वं च तस्यैव वेदवाक्यमिव द्विज ॥ संशयस्तु महाप्राज्ञ संजातो हृदये मम ॥ ११ ॥ तन्ममतं समासेन वक्तुमर्हसि पृच्छतः ॥

आशायाः आशावतः स्मर्मं अन्यत् कृशत्वेन समं किमपि नास्ति २

कृशाकृशेषु आशा जितः सर्वं तः ॥
ते तया श्रितानां सुखं तर्षः २

२२१

राजावरन्वनमिदंपुरा॥१४॥दुर्लभःसमयाद्रष्टुंनूनंपरमधार्मिकः॥एकःपुत्रोमहारण्येनष्ट इत्यसकृत्तदा॥१५॥दुर्लभःसमयाद्रष्टुमा
शाचमहतीमम॥तयापरीतगात्रोहंमुमूर्षुर्नात्रसंशयः॥१६॥एतच्छ्रुत्वासभगवांस्तनुर्मुनिवरोत्तमः॥अवाक्शिराध्यानपरोमुहूर्त्तमिवतत्
स्थिवान्॥१७॥तमनुध्यानमालक्ष्यराजापरमदुर्मनाः॥उवाचवाक्यंदीनात्मामंदंमंदमिवासकृत्॥१८॥दुर्लभंकिन्नुदेवर्षेआशायाश्चै
वकिंमहत्॥ब्रवीतुभगवानेतद्यदिगुह्यंनतेमपि॥१९॥मुनिरुवाच॥महर्षिर्भगवांस्तेनपूर्वमासीद्विमानितः॥बालिशांबुद्धिमास्थायमं
दभाग्यतयात्मनः॥२०॥अर्थयन्कलशंराजन्कांचनंवल्कलानिच॥अवज्ञायर्षिकेनापिनसंपादितवांस्ततः॥२१॥निर्विण्णःसराजर्षिर्नि
राशःसमपद्यत॥एवमुक्त्वाभिवाद्याथतमृषिंलोकपूजितं॥२२॥श्रांतोन्यषीदद्धर्मात्मायथात्वंनरसत्तम॥अर्घ्यंततःसमानीयपाद्यंचैव
महानृषिः॥२३॥आरण्यकेनविधिनाराज्ञेसर्वंन्यवेदयत्॥ततस्तेमुनयःसर्वेपरिवार्यनरर्षभं॥२४॥उपाविशन्नरव्याघ्रंसप्तर्षय इवध्रुवं
अपृच्छंश्चैवतंतत्रराजानमपराजितं॥प्रयोजनमिदंसर्वमाश्रमस्यनिवेशने॥२६॥इतिश्रीमहाभारतेशांतौराजधर्मेऋषभगीतासु॥१२६

तत्रापनार्थं स्थापयित्वा १ धर्मस्व नृ नं १

वासवस्तु धर्मभृतां वरः ॥२४॥ पूजयामास नयन्निश्चितं तपसा च श्रुतेन च ॥ स समानीय तत्पुत्रं तमुपालभ्य पार्थिवं ॥२५॥ आत्मानं दर्शयामास स धर्मिष्ठ
धर्मभृतांवरः ॥ दर्शयित्वा त्वात्मानं दिव्यमद्भुतदर्शनं ॥२६॥ वियाध्या विगतक्रोधस्त्वा वारदनसंनिकाश ॥ एतद्दृष्टं मया राजन्नल्पाववृषनन्तु
नं२७॥ आशामपनयस्वाशु नतं स्वश्तरीमिमां ॥ भीष्म उवाच ॥ सन्तथोक्तस्तदा राजन्नृषभेण महात्मना ॥२८॥ तनुमिन्द्रोपनयच्छीघ्रमा
शां कृशतरीं ततः ॥ एवं त्वमपि कौन्तेय श्रुत्वा वारणीमिमां स्थिरां ॥२९॥ स्थिरो भव महाराज हिमवानिव पर्वतः ॥ त्वद्विधस्यावश्यं तावश्रुत्य
नुगन्तुं चिरं ॥३०॥ श्रुत्वा मम महाराज न सन्तप्तुमिहार्हसि ॥ इति शांतौ राजधर्मे ऋषभगीता समाप्ता ॥१२७॥ युधिष्ठिर उवाच ॥ नामृतस्येव प
र्याप्तिर्ममास्ति ब्रुवति त्वयि ॥ यथा हि स्वात्मवृत्तिस्य नयात्रस्तोस्मि भारत ॥१॥ तस्मात्कथय भूयस्त्वं धर्ममेव पितामह ॥ न हि तृप्तिरसं श्रा
मि पिबन्धर्मामृतं हि ते ॥२॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं ॥ गौतमस्य च संवादं यमस्य च महात्मनः ॥३॥ पारियात्रं
गिरिं प्राप्य गौतमस्याश्रमो महान् ॥ उवास गौतमो यत्र कालं तमपि मे शृणु ॥४॥ षष्टिं वर्षसहस्राणि सोतप्यद्गौतमस्तपः ॥ तमुग्रतपसं तु

नृ २

२२२

री नवतो
नता श स्य
न्न तं यं
दत्रो यते। पर्याप्तिरत्नंभावस्तृप्तिनिति
यावत् २

समाधिमुक्ते ने नामपि त्वद्वाग मते
नात्र प्रस्तुता थः २

222

दुर्लभं किं नृत्यस्पो ११

पावकः
शा २

त्वत्तः कुशनरं किंनु ब्रवीतु भगवानिदं ॥१२॥ यदि गुह्यं न ते किंचिद्विद्यते मुनिसत्तम ॥ कुश उवाच ॥ दुर्लभोप्यर्थवान्ना स्त्रियो यैर्ध्यातिमवाप्नु
यात् ॥१३॥ स दुर्लभनरस्तात ते योषितं नैनां वृणमन्यते ॥ स त्वत्यनोपकुरुते परं शक्त्या यथार्हतः ॥१४॥ या सक्ता सर्वभूतेषु सा शाकुशनरी मया ॥
यथा शक्त्यानकुर्याद्योध्वनामाशांगरीयसी ॥१५॥ पुरा मन्वन्तरे दानेन सोऽतं कुशो भुवि ॥ आयास्यति ते पुत्रस्तव विना निवर्तकः ॥१६॥ त्व
या विसर्जितेषु दयाकार्या नराधिप ॥ राजाप्यमुदितो भूत्वा जगाम स्वगृहं ततः ॥१७॥ अथवन उवाच ॥ शक्तान्नरांस्तेष्वलस्तेषु व
अपकारिषु वा शक्ता सा शाकुशनरी मया ॥१८॥ एकः पुत्रः पिता पुत्रं नष्टे वा विने पिवा ॥ योनज्ञाना ति सा शाकुशनरी मया ॥१९॥ ब्र
तवं वैवनारीरगां नां पुत्रकारिता ॥ तथा नरेंद्र धने प्याप्ता कुशनरी मया ॥२०॥ कन्यानां वयसि स्थिते ॥ श्रुत्वा कथा स्त
पा युक्ता सा शाकुशनरी मया ॥२१॥ एतच्छ्रुत्वा ततो राजन् स राजा सावरोधनः ॥ संस्पृश्य पादौ शिरसा नियया तद्विजर्षभे ॥२२॥ राजोवाच ॥ प्र
सादये त्वां भगवन्पुत्रे रोद्धामि संगमं ॥ यदैतदुक्तं भवता संप्रति द्विजसत्तम ॥२३॥ सत्यं मेनत्क्रसं देहे यदंतद्याहतंन्वया ॥ ततः प्रसन्नस्य भग

शा ३

दुःखेन नआदीयते ऽगी क्रियते ऽतस्व

रुस्यः। प्रजा पीडनसं तापात्समुद्भूतो हुताशः — अविदग्धो कष्टदेवस्माधर्म्मे भवति १

२२३

भो मेष्व युधिष्ठिर॥ धर्म्मो ह्युरणीयान्बन्धनाद्विश्वभरतर्षभ॥६॥ श्रुत्वोपास्य सदाचारैः साधुर्भवति सकृद्विन्॥ कर्म्मणाबुद्धियोगेन भवन्या कोनवापुनः॥७॥ यादृशो यस्तु प्रश्नः सव्यवस्य स्वयं धिया॥ उपायं धर्म्म बहुत्वं यात्रार्थं स्मृत्यमारत॥८॥ नाहमेतादृशं धर्म्मं बुभूषे धर्म्म कारणात्॥ दुःखादानं हृस्त्रैषःस्यात् नुपश्चात्तत्तपोयमः॥९॥ अभिगम्य मतीनां हि सर्वासामेव निश्चयः॥ यथायथा हि पुरुषो नित्यं शास्त्रमवेक्षते॥१०॥ तथा तथा विजानाति विज्ञानं परयरोचन॥ अभिज्ञानाद्योगो हि योगो भूतिकरः परः॥ अशंकमानो वचनमनुसूयुरिदं स्मरण॥ राज्ञः कोषक्षयादेव जायते बलसंक्षयः॥१२॥ कोशं वजनयेद्राजा निर्जलेभ्योयथाजलं॥ कालं प्राप्यानुगृह्णीयादेष धर्म्मोऽत्र नातनः॥१३॥ उपायं धर्म्मं प्राप्येमं पर्वैराचरितं जनैः॥ प्राकोशात्प्राप्यते धर्म्मो वृत्तिर्धर्म्माद्गरीयसी॥१४॥ धर्म्मं प्राप्य न्यायवृत्तिं न वलीयान्न विंदति॥ यस्माद्बलस्योपपत्तिरेकांतेन न विद्यते॥१५॥ तस्मादापद्यधर्म्मोपि श्रूयते धर्म्मलक्षणः॥ अधर्म्मो जायते तस्मिन्निति वै कवयो विदुः॥१६॥ अनंतरं क्षत्रियस्य तत्र किं विचिकित्सते॥ यथास्य धर्म्मो न ग्लायेन्नेयाच्छत्रुवशं यथा॥१७॥ तत्कर्तव्यमिहेत्याहुर्नात्मानमव

॥ष॥
राना द
बुद्धिनि
र्तद्गति।
भिगम्या
तामतय

अवलः ३

२२२

स्वताहासर्वासांप्रज्ञानामिनिश्चयः १७०। ४६ — राज्यनाशकः ५ — प्रजाकर्षनाद् २ धर्मो पाप

अमुरव्यं धर्मं लिखित मार्ग २ — चयं वा अकृत धर्म्म वस्त्र याधर्म इति

उपधर्म २ — १६ × २

वद्यमानानां मापद्धर्मीशांस्त्रभूतः॥ तत्र सर्वप्रकारैरापदि आगतायामधर्मेणापि प्रजापीडनेनापि कोशवृद्धिः क-
र्तव्या तेनैव सर्वा आपदस्तरतीति अध्यायार्थः ५

लंभावितं सुमहामुनिं॥ ५॥ उपयातो नरव्याघ्र लोकपालो यमस्तदा॥ तमपश्यत्सुनियतं समर्पितं वै गौतमं तदा॥ ६॥ स तं विदित्वा ब्रह्मर्षिर्यममागत-
मोजसा॥ प्रांजलिः प्रयतो भूत्वा उपविष्टस्तपोधनः॥ ७॥ तं धर्मराजो दृष्ट्वैव सत्कृत्यैव द्विजर्षभं॥ न्यमंत्रयत धर्मेण क्रियतां किमिति ब्रुवन्॥ ८॥
गौतम उवाच॥ मातापितृभ्यामानृण्यं किं कृत्वा समवाप्नुयात्॥ कथं च लोकानाप्नोति पुरुषो दुर्लभान्शुभान्॥ ९॥ यम उवाच॥ तपःशौचवता
नित्यं सत्यधर्मरतेन च॥ मातापित्रोरहरहः पूजनं कार्यमंजसा॥ १०॥ अश्वमेधैश्च यष्टव्यं बहुभिः स्वाप्तदक्षिणैः॥ तेन लोकानवाप्नोति पुरु-
षोऽद्भुतदर्शनान्॥ ११॥ इति महाभारते शांतौ राजधर्मे॥ १२९॥ युधिष्ठिर उवाच॥ मित्रैः प्रहीयमानस्य बह्वमित्रस्य का गतिः॥ राज्ञः सन्क्षीण-
कोशस्य बलहीनस्य भारत॥ १॥ दुष्टामात्यसहायस्य च्युतमंत्रस्य सर्वशः॥ राज्यात्प्रच्यवमानस्य गतिमन्यामपश्यतः॥ २॥ परचक्राभियातस्य
पर रा ष्ट्राणि मर्दतः॥ विग्रहे वर्त्तमानस्य दुर्बलस्य बलीयसा॥ ३॥ असंविहितराष्ट्रस्य देशकालावजानतः॥ अप्राप्यं च भवेत्सान्त्वं भेदो वाप्य-
ति पीडनात् ॥ जीवितं त्वर्थहेतुर्वा न च किं सुकृतं भवेत्॥ भीष्म उवाच॥ गुह्यं धर्ममिमं मां त्वं पृच्छसि भरतर्षभ॥ अपृष्टो नोत्सहे वक्तुं ध-

असंविहितं सम्यग् रक्षितं राष्ट्रं येन तस्य। अतिपीडनात् परकीयामात्यादीनां भेदोपि अप्राप्यः।
तत्र अर्थहेतुं जीवितं वा सुकृतं तत्र अर्थे शस्त्रमार्गेणापि ग्राह्यः। तत्र अर्थं [illegible] परिसाद्देन प्रश्नः ४ ॥ १

परस्य बलेन
नाशे प्रति
अभियात
स्य बलीय
ता सार्द्धं

दौर्लभ्यं यथा भवति। एवं सत्यं च

...न्यर्थः। एतत्पूर्वं ह्युक्तं (कूतत ः२) दश।०।१२।१४।९





...ण्ण ग्ण शापादि॥३०॥ नित्यमेव हि कर्त्तव्याः स एष धर्म्मः सनातनः॥ राजा राष्ट्रं यथा पायात्तस्कराद्यैश्च चौरैरभिरक्षति॥ ३१॥ राष्ट्रेन राजा व्यसने रक्षि...
...तं तथा भवेत्॥ कोशं दंडं वलं मित्रं यदन्यदपि संचितं॥३२॥ न कुर्वीत ततं राष्ट्रे राजा परिगतं क्षुधा॥ बीजं भक्तेन संपाद्यमिति धर्म्मविदो विदुः॥३३॥ अत्रैतच्छ्रवरस्याहु महत्पापस्य दर्शनं॥ धिक् तस्य जीवितं राज्ञो राष्ट्रं यस्यावसीदति॥ ३४॥ अवस्माल्लमनुष्या पियोवदाशि...
...कश्चपि॥ राज्ञः कोशं वलं मूलं कोशमूलं पुनर्वलं॥३५॥ तन्मूलं सर्वधर्म्माणां धर्म्ममूलाः पुनः प्रजाः॥ न्यानपीडयित्वेतस्कोराः शक्यः कु...
...तो वलं॥३६॥ तदर्थं पीडयित्वा च दोषं प्राप्नं न सोऽर्हति॥ अकार्यमपि यज्ञार्थं क्रियते यज्ञकर्मसु॥३७॥ एतस्मात्कारणाद्राजा न दोषं प्राप्तुमर्ह...
...सि॥ अर्थार्थमन्यद्भवति विपरीतमथापरं॥३८॥ अनर्थार्थमथाप्यन्यत्तत्सर्वमर्थकारणं॥ एवं बुद्ध्या संप्रपश्येन्मेधावीकर्म निश्चयं॥
३९॥ यज्ञार्थमन्यद्भवति यज्ञो नार्थस्तथापरः॥ यज्ञस्यार्थार्थमेवान्यत्तत्सर्वं यज्ञसाधनं॥४०॥ उपमामत्र वक्ष्यामि धर्म्मजत्त्वप्रकाशिनीं
यूपं छिंदंति यज्ञार्थं भग्नये परिपंथिनः॥४१॥ द्रुमाः केवलसामंताद्ध्रुवं छिंदंति तानपि॥ ते चापि निपतंतोऽन्यान्निघ्नंत्येव वनस्पतीन्॥४२



दोषांर्थ ४

...नोपजी वी ३

ना ५

...ाया यदि प्रजापीडनं अप्यर्थार्थं भवति। एवं अपीडनं विपरीतं। अनर्थार्थं भवति। अन्यथा अर्थी... अर्थं कुर्वना
...२३९। यज्ञार्थमिति। यथा... ...दि... त्यर्थः। ...एवं अर्थार्थं
...र्थं भवति। एवं दंडकोशौ वलार्थं... ...भवार्थं। कोशो वलं जयश्चेति। त्र्यं... ...जिनि माः ४०४ २

संखे स्वलाराखे लिखितौ रत्नैः दिष्टमा त्रालंविनी ना ज्ञाजीवितुं न शक्यं ९

आत्मानमुद्धतुं मिच्छेदित्यर्थः १

स्वर्णे १ धर्म १

सादयेत्॥सर्वात्मनैवधर्मस्यनपरस्यनचात्मनः॥१९॥सर्वोपायैर्निरीहैर्वेदात्मानमितिनिश्चयः॥नचधर्म्मविदांनानानिश्चयोधर्म्मनैपुणं॥
२९॥उधर्मोनैपुणंज्ञात्वैवाकुर्वीयादितिश्रुतिः॥क्षत्रियोवृत्तिसंरोधेकस्यनादातुमर्हति॥२०॥अन्यत्रतापसस्वाद्यविप्रस्वाच्चसर्वतथा॥
यथावैब्राह्मणःसीदन्नयाज्यमपियाजयेत्॥२१॥अभोज्यान्नानिवाश्नीयात्तथेदंनात्रसंशयः॥पीडितस्यकिमद्वारमुत्पथोविधृतस्यच॥
२२॥अद्वारतःप्रद्रवतियदाभवतिपीडितः॥यस्यकोशबलग्लान्यासर्वलोकपराभवः॥२३॥भैक्ष्यचर्यानविहितानचविट्शूद्रजीविका॥स्व
धर्म्मानंतरावृत्तिर्जात्यानतुपजीवत॥२४॥वहतःप्रथमंकल्पमनुकल्पेनजीवनं॥आपद्गतेनधर्म्मोणमन्यायेनोपजीवनं॥२५॥अपिचे
द्ब्राह्मणोवृत्ततिपरिक्षये॥क्षत्रियेसंशयःकस्मादित्येवंनिश्चितंसदा॥२६॥आददीतविशिष्टेभ्योनावसीदेत्कथंचन॥हर्तारंरक्षितारंच
प्रजानांक्षत्रियंविदुः॥२७॥तस्मात्संरक्षनाकार्यमादानंक्षत्रबंधुना॥अन्यत्रराजन्हिंसायावृत्तिर्नेहास्तिकस्यचित्॥२८॥अप्यरण्यसमु
त्पन्नस्य कस्यचित्तोमुने॥नशंखलिखितांवृत्तिंशक्यमास्थायजीवितुं॥२९॥विशेषतःकुरुश्रेष्ठप्रजापालनमीप्सया॥परस्परंहिंसंरक्षा

आत्मानमुद्धतुंमिच्छेदित्यर्थः ४

अनंतरं ... विहितेन ... जात्या ...

संभाननत. प०
२
अन्यायेन वि
पर्ययेन तु प्र
क्षिततम्
...
तु ...
त्ति प्रतिमत...
नामेवात्र स्यचावे
यं विहितं ४

यथानास्त्यधनस्तथेति जीवन्नपि तत्त्वमधनस्पोऽसतं॥४४॥ आपदि द्रव्यापीडनं विहितं तदेवानापदि निषिद्धं २

२तौ च संग्रहत्यागौ शक्यस्मिन्पुरुषे न संभवतः। युगपत् तयोरेति निषिद्धयति। विना कुं ... संग्रहात् संभवति॥४६॥ २

२२५

एवंकोशस्यमहतोयेनराःपरिपंथिनः॥तानहत्वानपश्यामिसिद्धिमत्रपरंतप॥४३॥धनेनजयतेलोकावुभौपरमिमंतथा॥सत्यंचध
र्म्मंवचनंयथानास्त्यधनस्तथा॥४४॥सर्वोपायैरादद्गीतधनंयज्ञप्रयोजनं॥नतुल्यदोषःस्यादेवंकार्याकार्येषुभारत॥४५॥नैतौसंभव
तोराजन्कथंचिदपिपार्थिव॥नह्यरण्येषुपश्यामिधनवृद्धानहंक्वचित्॥४६॥यदिदंदृश्यतेवित्तंपृथिव्यामिहकिंचन॥ममेदंस्यान्ममे
दंस्यादित्येवकांक्षतेजनः॥४७॥नचराज्यसमोधर्म्मःकश्चिदस्तिपरंतप॥धर्म्मंसंशब्दितोराज्ञामापदर्थमतोन्यथा॥४८॥दानेनकर्मणा
चान्येतपसान्येतपस्विनः॥बुध्याद्क्ष्यैणचैवान्येविंदंतिधनसंचयान्॥४९॥अधनंदुर्बलंप्राहुर्धनेनबलवान्भवेत्॥सर्वंधनवताप्राप्यं
सर्वंतरतिकोशवान्॥५०॥कोशेनधर्म्मःकामश्चपरलोकस्तथाह्ययं॥सचधर्म्मेणलिप्सेतनाधर्म्मेणकदाचन॥५१॥इतिश्रीमहाभा
रतेशांतौराजधर्म्मःसमाप्तमिति॥१२९॥छ॥शुभंभूयात्॥सम्वत्१८१९॥शाके१६८४॥आश्विनवदि४चतुर्थीभौमेसालेषि॥शुभमस्तु

२२५



२२५ अस्याग्रे आपद्धर्म भा...

226